सीताहरणम्

18983

कालूरि हनुमन्तराव

ले

RASHTRIYA SANSKRIT SANSTHAN (D.U.)
RAJIV GANDHI CAMPUS, SRINGERI

LIBRARY

ACC. NO. 18983

CALL NO.

सीताहरणम्

पञ्चाङ्कात्मकं नाटकम्

Presented to Sri

Natakam (T)

By

Kaluri Hanumantha Rao,
Author.

Rashtriya Sanskrit Sansthan.
(Deemed University)

Published with the financial assistance from the Ministry of Education, Government of India.

SITA HARANAM — सीताहरणम्

First Edition 1987 — प्रथमावृत्तिः १९८७

1000 Copies — १००० प्रतयः

Copy Right Reserved — सर्वेऽधिकाराः स्वायत्ताः

प्रदर्शनार्थं रचयितुः अनुमतिः प्राप्तव्या ।

For copies
Mrs. K. V. Seshu Bai
L/58, Osmania University
Quarters, Hyderabad-500007

printed at
Jitendra Printing Works
Kutbiguda, Hyderabad-27

16/-
Price Rs.

निवेदनम्

महद्भिर्नाटककर्तृभिः क्षुण्णायां रामकथायां ममापि रचनाप्रसारः किमर्थमिति चेदिदं विज्ञाप्यते। यावन्मया रामायणकाव्यं भूयो भूयः पठितं परिशीलितं च तावद् बहुपरिवर्तनैर्यथार्थकथा बहुधा रूपान्तरितेति ममाभिप्रायो दृढीभूतः। प्रथमतश्चरित्रे पश्चाद् गायकैरनन्तरं प्रतिलिपि-करैरित्येवं तिसृषु दशासु रामकथा विपरिणता बभूव। एषा-मभिप्रायाणां निबन्धः अनुबन्धरूपेण संयोजितोऽत्रान्ते यतो ज्ञायतेऽस्य नाटकस्य वस्तु कीदृशमिति।

भारतसर्वकारेणास्य ग्रन्थस्य प्रकाशनार्थं धनसाहाय्यं कृतम्। तस्य कृतज्ञतां निवेदयामि।

प्रथमं सुधर्मापत्रिकायां नाटकमिदं प्रकाशितं यत्कृते तत्सम्पादकेभ्यः कृतज्ञतां प्रकटयामि।

मम नाटकं पठित्वा संस्करणसूचनैः साकमनुमोदनं प्रोत्साहं च दत्तवद्भ्यो मित्रेभ्यो विठलदेवुनि सुन्दरशर्मभ्यो धन्यवादान् वाचयामि।

अभिप्रायप्रदात्रीभ्यः श्रीमतीभ्यो डा. नलिनी साधले महोदयाभ्यः कृतज्ञतां निवेदयामि।

मुद्रणशोधने सहकृत्वर्याः मम पुत्र्याः सीतायाः आशिषो वितरामि ।

सम्प्रति मम पितुः स्मरामि । अस्मज्जनकः कीर्तिशेषः कालूरि व्यासमूर्तिः सर्वं जीवितकालं रामायणमहाभारत-विमर्शने प्रवचने चायापयत्, चरमसमये सीतारामलक्ष्मणानां वनगमनं जल्पन् प्राणानत्यजत् । तस्य द्वावभिप्रायौ मया उपयुक्तौ एको नाटके मारीचस्वभावचर्चायामपरश्च अनुबन्धे कैकेयीमनोगताभिप्रायचर्चायाम् ।

अस्य नाटकस्य गुणनिर्णये विद्वांसः प्रमाणम् ।

कालूरि हनुमन्तरावः

F ...iya Sanskrit Sansthan
(Deemed University)
Rajiv Gandhi Campus, Sringeri
LIBRARY
18983



K. HANUMANTHA RAO

Date of birth - 20th September 1931

Occupation -

Professor in Technology
(Technology of Pharmaceuticals and Fine Chemicals)

College of Technology

Osmania University

Hyderabad-500007

PREFACE

'Sitaharanam is a Sanskrit play based on Ramayana. The author, Shri Hanumantha.Rao, already has to his credit some works both in Sanskrit and Telugu and is not, therefore, new to the literary world.

Sanskrit literature has to its credit an uninterrupted tradition of Ramayana plays. Right from the days of Bhasa and Bhavabhuti the epic has fascinated Sanskrit play-wrights· Fom ninth century onwards Murari and Rajashekhara set a special trend for it. अनर्घराघव, बालरामायण, प्रसन्नराघव, कुंदमाला, उन्मत्तराघव, अद्भत-दर्पण etc. are some of the noteworthy Ramayana-plays. Changing the form from the epic to the dramatic was not the only purpose behind this literary activity. Often writers have experimented very boldly with the story and the characters. Deviations are many. New meanings are found for the epic events. Characters are recast and reinterpreted. Innovations are numerous although the broad outline of the story has always remained intact.

In this play named 'Sitaharanam' Shri Hanumantha Rao too chooses the same legendary theme. The play

completely omits the events of Balakanda and Ayodhyakanda of the Ramayana as also most of those of the Aranyakanda. It begins with Ravana's entry and his entreaty to Maricha for assisting him in his scheme of abducting Sita. Since 'Sitaharana' is the main event of the play, the author has succeeded in focussing attention on the main subject from the beginning. The remaining events of the Aranyakanda are then briefly but faithfully depicted beginning from the sighting of the 'Mayamriga' by Sita to the abduction of Sita by Ravana with which the first act comes to an end. Acts II & III depict the incidents of the Kishkindha kanda. The second, which, incidentally is the longest of the five acts, brings the story down to Valivadha, while the third depicts the critical situation in which, Rama is angered by Sugriva's indifference to his cause and sends Lakshmana to him to protest against his behaviour. The fourth depicts the events of the Sundarakanda and attention is naturally focussed here on Hanuman. The fifth and the last act describes the incidents preceding the war between Rama and Ravana. The play ends happily with the reunion of Sita and Rama and with the hint of Rama's coronation.

Thus the author follows the original story very closely. Granted the plays based on 'Khyata Vritta' like this offer limited scope to the creative ability of the

author the deviations often reveal the same to advantage.

Regarding the 'Vanaras' in the Ramayana various opinions have been expressed by scholars. Critics like C.V. Vaidya have put forward several valid grounds on which they must be treated as human beings and not monkeys as they are generally believed to be. The present author also firmly believes that Hanuman, Vali, Sugriva and others belong to the human species. He has discussed the point in his appendix and has also provided explanation in the body of the text. He has quoted the authority of G. Ramadasu in the appendix in his support. (तेषां तन्नाम पुरुषाणां वस्त्रधारणविधानात् प्राप्तं यतः पुरुषा दीर्घवस्त्रमधो लम्बमानं धरन्ति ।) It is clear from this that the author does not find it necessary to follow the tradition blindly and has the courage to defy it if necessary.

The main deviation from the Ramayana story, however, is the happy ending. Sita, here, is not required to face the humiliation which she does in the original epic when after his victory over Ravana, Rama tells her-

"विदितश्चास्तु भद्रं ते योऽयं रणपरिश्रमः ।
सुतीर्णः सुहृदां वीर्यान्न त्वदर्थं मया कृतः ॥

प्राप्तचारित्रसन्देहा मम प्रतिमुखे स्थिता ।
दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढम् ।।
तद्गच्छ त्वानुजानेऽद्य यथेष्टं जनकात्मजे ।
एता दशदिशो भद्रे कार्यमस्ति न मे त्वया ।।" (युद्ध, ११५)

The words with which Rama warmly receives Sita after the agonising separation in this play can very well be contrasted with these utterances of Rama in the epic. Here he says to Sita, 'सर्वं कष्टं तदपगमितं त्वन्मुखे दृश्यमानें'. She is not required here to 'prove' her chastity by undergoing the fire-ordeal. At the end there is a passing reference to the public calumny but the way Rama reacts to it is altogether different here. We do not meet here Bhavabhuthi's Rama who at the outset declares-

"स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ।।"

If the king's commitment to his subjects is so total for Bhavabhuti's Rama, equally if not more binding is the husband's commitment to his wife according to Rama as depicted by the present author. A man must take permission of his wife even for renunciation. Hence Rama just cannot repudiate Sita, particularly when she herself has followed him faithfully and affectionately through the rigours of exile. Rama

has no difficulty, however, in renouncing the kingdom of Ayodhya, once again. Bharata could take care of the kingdom.

Fortunately the subjects do not approve of such an arrangement and Vasishtha too, advises Rama against it saying, 'people find fault even with God. Their words must not be given undue importance'. Rama obeys the preceptor and accepts the throne. Rama's repudiation of Sita has been questioned again and again by latter writers. Scholars believe the entire Uttarakanda to be a latter interpolation to the epic. Hence there is no wonder in a modern writer questioning it and even rejecting it. What is more important here is the reasoning that he puts forth in his support. The solemnity of the nuptial vow is weighed here with the king's pledge of loyalty to his subjects. The author has discussed this issue at length in the appendix.

The renouncing of the kingdom second time may, however, need a closer scrutiny. 'Bharata may continue to rule' - says Rama. Perhaps he has said it too easily. Bharata has accepted the responsibility of the kingdom even at the first time as an emissary of Rama and that too, on condition that at the end of the exile Rama would take back the responsibility.

Bharata has put down the condition very flirmly and solemnly. He said-

"तव पादुकयोर्न्यस्य राज्यतन्त्रं परंतप ।
चतुर्दशे हि सम्पूर्णे वर्षेऽहनि रघूत्तम ॥
न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् ॥" अयो. ११२

How far would it be just on the part of Rama to pass on the responsibility to Bharata once again is the question that should be answered here. However, the point need not be argued since there is a well-established view held by several scholars that Valmiki Ramayana concludes with the events of the Yuddha-kanda after Rama's coronation. Hence every wri;er should feel free to present the following part of the epic according to his own understanding of the story. What is important here is that the process of interpreting the legend continues and the tradition is thus kept alive.

Works like Ramayana and Mahabharatha are continuosly read and appreciated for several centuries not simply for their literary beauty or religious purpose. They contain the miraculous power and potency to envisage almost any kind of situation likely to be faced by an individual in his life; any type of problem likely to be encountered by a society and to guide

them on the right path. It is in this sense that they are our cultural treasure. Modern writers have often turned to them for projecting a social problem of the present day and for suggesting solutions to them.

After reading the prologue of 'Sitaharana' one gets an impression that Shri Hanumantha Rao also intends to project through this play, the problem of women. There we are told about a certain lady working as a school-teacher being kidnapped by rogues. Fortunately the police is informed in time who chase the car in which the rogues were speeding away. The police apprehend the criminals and rescue the lady. On hearing this the Pariparshvaka condemns the male-dominated society which can never afford securit and peace to women.

This prologue creates expectation in the readers' minds that the author is inspired to write a drama on a legendary theme in order to project this social evil of male domination resulting in the abduction of helpless women, to focuss attention on the problem of such women when without any fault on their part they are rejected by their families and by the society in general, to suggest a solution for their rehabilitation. Instances of conveying a modern thought emphatically through a legendary story are many. In Telugu

itself Narla Venkateshwara Rao has composed plays like 'Jabali' and 'Sitajosyam' which have attracted attention of the non-Telugu world too. The present drama could have risen to greater heights, achieved a new dimension if it had pointedly focussed attention on some such problem of social significance. The writer has the capacity, the courage and the potential to do this. At the end he has shown Rama and the wiser portion of the society accepting Sita but the thought remains more as a glimpse than as a strong conviction to be focussed and emphatically conveyed through the play. The appendix, no doubt, vouchsafes for the author's strong conviction in favour of the modern thought. However, the play has not succeeded in articulating it with a proper emphasis.

The writer's inspiration in choosing a legendary theme appears to be mainly literary. He has renarrated the selected part of the Ramayana story in a simple language giving it a dramatic form. The traditional set-up of Nandi, Prasthavana and acts consisting of prose and verse is maintained quite faithfully. The division of an act into smaller scenes as found in the western plays is a modern feature of the play. This has also necessitated the adoption of the modern technic of using the middle curtain (रङ्गमध्ययवनिका).Traditional प्रवेशकs and विष्कम्भकs are dispensed with. The

language of the dialogues flows easily and smoothly. Rarely does one come across an idiom or a phrase which appears non-Sanskritic being influenced by the modern languages. Certain instances like the compound in the very first verse 'हरगिरिजैकमूर्तिदेवौ" appear forcefully manufactured and may even raise the eyebrows of the grammarians. But these instances are so rare that they can be ignored. It should be possible to have a more liberal attitude towards minor deviations from rules of grammar if Sanskrit language must not be stamped forever as a dead language.

Shri Hanumantha Rao has complete command on his prose but the same cannot be said of verses. Often they lack the charm and cheerfulness of the natural flow of his prose. Examples of यतिभङ्ग are many. But all these are very minor defects in a play of the stature of Sitaharanam. The only serious flaw that needs to be pointed out is the occasional length of the dialogues and monologues which seriously hamper the otherwise swift and interesting flow of the story. This happens specially when events are reported rather than represented. Thus the Jatayu-episode in Vijaya's mouth or the Kishkindha-episode in Sugriva's mouth render the play undramatic. Equally ineffective and uninteresting is the account of the unseen war (which incidentally omits the actual fight between Rama and

Ravana) in the fifth act. Such instances are detrimental to the form and spirit of a drama,

But the author shares the defect with most of the other playwrights who have chosen Ramayana or Mahabharata as a theme of their plays. They are too ambitious while choosing the plot. They are, therefore, forced to convert most of their, 'Itivritta' into a narration.

However, it must be stated without hesitation that Shri Hanumantha Rao although a scholar in technical side has so much literary talent and artistic temperament in him that he will definitely carve out a place of honour for himself among the galaxy of the creative writers. I wish him a glorious literary career.

NALINI SADHALE
(Professor, Dept. of Sanskrit,
Osmania University, Hyderabad)

5th September, 1987.

Hyderabad.

पात्रपरिचयः

पुरुषाः
सूत्रधारः
पारिपार्श्वकः
रामः
लक्ष्मणः
भरतः
शत्रुघ्नः
रावणः
सुग्रीवः
हनुमान्
वाली
अङ्गदः
मैन्दः
द्विविदः
जाम्बवान्
विजयः – सिद्धः ।
विलासः ,,
मारीचः
पुरुषः – लङ्कानागरिकः ।
राजभटः
प्रहस्तः – रावणामात्यः ।
कुम्भकर्णः
विभीषणः
इन्द्रजित्
मकराक्षः - रावणसेनानीः ।
विरूपाक्षः ,,
शुकः - रावणानुचरः ।
सारणः ,,
अविन्ध्यः – राक्षसः ।
वसिष्ठः
सुमन्त्रः – रामसचिवः ।
नन्दकः – राजपुरुषः
परिचारकाः

स्त्रियः

सीता
तारा
मालती–अन्तःपुरपरिचारिका
वासन्ती ,,
मल्लिका ,,
विनता – राक्षसी
वृकोदरी ,,
धान्यमालिनी–रावणपत्नी ।
परिचारिकाः

सीताहरणम्

प्रथमः अङ्कः

देयास्तां सकलशुभानि सर्वदा वः
सर्वेषां हरगिरिजैकमूर्तिदेवौ ।
विश्लेषो भवति कदापि भिन्नयोरि-
त्येकत्वे हृदयशरीरयोः स्थितौ यौ ॥

असुरेण हृतं क्षेत्रं हत्वा तं संररक्ष यः ।
सोऽव्याद्विश्वम्भरो युष्मान् लीलाकोलाकृतिर्हरिः ॥

नान्द्यन्ते

सूत्रधारः – मारिष ! इतस्तावत् ।

पारिपार्श्वकः – (प्रविश्य) भाव ! अयमस्मि ।

सूत्र – नितरामुद्विजते मम चेतः ।

पारि – किमर्थम् ?

सूत्र – मारिष ! किं न जानासि ? प्रतिवर्षानुसारेण प्रवर्तमाने अस्मिन् श्रीरामनवमीमहोत्सवे अद्य कोऽप्यपूर्वो नाटकप्रयोगो निर्वहणीय इति नगरप्रमुखैर्बहुदिनेभ्यः

प्रागेवादिष्टोऽस्मि । गुणागुणविवेकसमर्था अभिरूपभूयिष्ठा परिषत् प्रयोगं प्रतीक्षमाणा उपतिष्ठति चेदानीम् ।

पारि – कथं न जानामि । कालूरिवंश्येन आन्ध्रसंस्कृतोभयभाषाकविना साहितीजगतीनामकसाहित्यशास्त्रग्रन्थकर्त्रा हनुमन्तरावेण विरचितं 'सीताहरणं' नाम नवीनं नाटकं प्रयोक्तुं पूर्वमेव भवता निश्चितं सर्वश्च नटवर्गः सज्जितः सुशिक्षितश्च । आसन्ने प्रयोगकाले किमिति पर्याकुलितो भवान् ?

सूत्र – न केवलं पर्याकुलो भृशं विषण्णोऽस्मि । ह्यः आ सायं प्रयोगे अन्तिमशिक्षां दत्वा विसर्जिता नटाः । ह्य एव सायन्तने मैन्दपात्रधारिणो रामरावस्य पत्नी पाठशालायामध्यापिका ततो गृहं निवर्तमाना कैश्चित्खलैः वृहत्यां वीथ्यां प्रगृह्य तैलेन्धनशकटे बलान्निवेश्य उच्चैराक्रोशन्ती अपहृता किलाभूत् । दिष्टचा रक्षकभटाः समये केनापि सूचितास्तान् प्रतिरुद्धच नगरान्नातिदूरमपक्रान्तान् अगृह्णन् तां च प्रत्यानैषुः ।

पारि – अत्याहितमत्याहितं खलु परिहृतम् । किन्तु प्रतिदिनमीदृशीः वार्ताः शृण्वतामस्माकं साधारणीयं खलु परिणता संघटना अद्यत्वे । कष्टं भोः कष्टं यदा सहस्रेभ्यो वर्षेभ्यः पुरुषप्रभुत्वधर्षणावज्ञाभिर्घूर्णमानं सञ्चलति स्त्रीजीवितं विश्वस्मिन् ।

यावत् शास्ति हिनस्ति च
कामयते यावदथ पराभवति च ।
तावन्नारीं पुरुषो
न प्रीणाति न सभाजयति च ।।

सूत्र – सम्यगाह भवान् । अनया आकस्मिकापत्त्या विषण्णो रामरावः अद्य नाटके पात्रं न धरिष्यामीति मामवोचत् ।

पारि – मा तावता विषीदतु भवान् । तामपि भूमिकामहं निर्वक्ष्यामि । प्रचलतु नाम नाटकप्रयोगः । हन्त प्रारब्ध एव ! अयमयमागच्छति सीताहरणं संप्रधारयन् पापनिश्चयो रावणः । इतोऽपसरावः ।

सूत्र – बाढम् । (इति निष्क्रान्तौ) ।

प्रस्तावना

प्रथमं दृश्यम्

(ततः प्रविशति रावणः ।)

रावणः–अहो ललनासौन्दर्यस्य परसीमता ! अहो लावण्यस्यैकत्र राशीभावः !

स्थितौ तस्याः काचिल्लसति रुचिरा नर्तनगतिः
चलन्ती शम्पेव स्फुरति गहनाम्भोदपटले ।

सदा द्रष्टव्यं तन्मृदुहसितविद्योतितमुखं
सुवृत्तं मन्येऽस्या विपुलजघनं मन्मथरथम् ॥

सोदरीपराभवामर्षितः खरदूषणवधोद्दीप्तकोपोऽहं सीतां हर्तुं नृशंसं तं रामं हन्तुं च लङ्कायाः निर्गतो दण्डकारण्यमागतोऽस्मि। मित्रं मारीचं प्रति प्रस्थितस्तन्मतं ग्रहीतुं प्रथमं पञ्चवटीं गत्वा लावण्यमूर्तिं सीतां दुर्विदग्धौ तौ रामलक्ष्मणौ च प्रच्छन्नमपश्यम्। रामगतक्रोधापेक्षया अधुना सीतागतो मदनतापो मामतीव बाधते। अहो कोऽयमपूर्ववनितासौन्दर्यविशेषः!

सुनासं रम्योष्ठं मधुरमुखमुद्धृत्य युगलं
दृशोः कन्दर्पस्योद्यतमिव शरासं विदधती।
करं व्याप्यात्यन्तं कुसुमभरशाखासुरुचिरं
सुमान्यालुम्पन्ती मनसि मम गाढं स्थितवती ॥

मारीचेन सह समालोच्य युक्तमुपायं संचिन्त्य प्रथमं सीतामपहृत्य लङ्कामपनेष्यामि। तदवमानेन दूनः कृशो रामो नशिष्यति निराशो वा अयोध्यां प्रतिनिवर्तिष्यते। (पुरतो दृष्ट्वा) अयं खलु दृश्यते मित्रस्य मारीचस्याश्रमः। (परिक्रम्य) भो मित्र मारीच!

(रङ्गस्थलमध्ये यवनिका अपस्रियते। अन्तर्मारीचस्याश्रमो दृश्यते।)

मारी – (बहिरागत्य दृष्ट्वा) अहो प्रियमित्रं रावणसार्वभौमः। कियान् खलु कालो भवतो दर्शनस्य। मित्रवर्य ! स्वागतं ते।

(रावणः आश्रमं प्रविशति, उभौ कटे उपविशतः।)

मारीचः – अपि कुशलं भवतः ? अपि कुशलिनो सर्वेऽस्माकं बान्धवाः सुहृदश्च लङ्कायाम् ?

राव – सर्वे कुशलिनस्तत्र। इह भवान् कथं वर्तते ? अपि तपो वर्धते ?

मारी – सर्वं मम क्षेमयुतमस्ति। महाराज ! भवदाकस्मिकागमनस्य यदि कश्चन विशेषोऽस्ति यदि च स ज्ञातव्यः तर्हि श्रोतुमवहितोऽस्मि।

राव – सम्यगूहितं मित्रेण। अपि ज्ञातं भवतः खरदूषणादीनां वधो जनस्थाने केनापि रामेण नामायोध्यकेन राजकुमारेण ?

मारी – श्रुतं श्रुतं तद् वृत्तम्।

राव – प्रव्रजितो विरागः प्रशान्तमित्थं भाषसे मम तु मनो दंदह्यते प्रतिचिकीर्षया।

मारी – युज्यते। प्रबलस्ते शत्रुः। अहमपि जानामि तस्य शौर्यम्।

राव – खलः स रामः केनापि किल दोषेण पित्रा राज्यान्निष्कासितो भार्यया भ्रात्रा च सहारण्ये निवसति। मित्र मारीच! श्रूयताम्। सीता नाम सा वनिता सौन्दर्येण सर्वाः स्त्रियः अतिशेते। न मया तादृशी लावण्यवती ललना दृष्टपूर्वा। संक्षेपतो ब्रवीमि ममागमनप्रयोजनम्। सीतां हृत्वा लङ्कां नेष्यामि। तस्मिन् कार्ये मम साहाय्यं करोतु भवान्।

मारी –(स्वगतम्)अये वामशीलता जाल्मस्य। सर्वदा विपरीतं व्यवस्यति। (प्रकाशम्) महाराज! अप्रियमपि हितमवश्यं वक्तव्यमिति वच्मि। मा मह्यं कुप्य। सुमहान् किल शूरो रामो य एकः खरदूषणादीनवधीत्। अतो लङ्कां निवर्तस्व त्यज रामे शत्रुताम्। यद्येतन्न रोचते ससैन्यो युद्धयस्व विजयस्व च। सर्वथा परदारहरणोद्यमाद् विरम।

राव – (उत्थाय) भो मारीच! सुनिश्चितं मम सीताहरणम्। मया नाम सीता अधिगन्तव्या। प्रियवचनैर्बहुमानैश्च तां तोषयिष्यामि मयि स्निग्धां करिष्यामि। का नाम स्त्री भोगैराकृष्टा न भवेत्। पश्चाद्रामं हनिष्यामि यदि स्वयमेव न मरिष्यति। अतस्त्वां वदामि तस्या हरणे मम साहाय्यं कुरु इति।

मारी – (उत्थाय) महाराज ! यथा भवते रोचते तथा क्रियताम् । प्रार्थये अस्मिन् कार्ये मा मम निर्बन्धं करोतु । नितान्तमहं बिभेमि रामात् ।

राव – मारीच ! नाहं तवोपदेशार्थी । प्रियः सुहृदित्येतावता सानुनयमुच्यसे । यदि नानुरुणत्सि, तदाज्ञाप्यसे । मरणदण्डेन दण्डयसे यदि मम वचनं न करिष्यसि ।

मारी – (स्व) का गतिः । मूर्खेण सह शत्रुत्वमेव मित्रत्वाद् वरं यतः शत्रुः रुष्टस्सन् हन्तुमुद्युङ्क्ते मूर्खस्य मित्रस्य रुष्टस्य प्रसन्नस्य च नान्तरं विद्यते ।

मूर्खः सखा कोपवशो यदि स्याद्
दयाविहीनः प्रहृतीः प्रयच्छेत् ।
गाढोपगूहेन निपीडयमानान्
श्वासान् निरुन्ध्यादथ चेत्प्रसन्नः ।।

(प्र) आदिशतु महाराजः किं मया करणीयमिति ।

राव – त्वं मायामास्थाय स्वर्णमयो हरिणो भूत्वा रामाश्रमसमीपे तथा संचर यथा तव वपुस्सौन्दर्येण मोहिता सीता त्वां ग्रहीतुं रामलक्ष्मणयोराग्रहं करिष्यति । निर्गतयोस्तयोस्तां सुलभं हरिष्यामि । तथा त्वया विधातव्यं यथा उभावपि तौ रामलक्ष्मणौ निर्गच्छेताम् ।

मारी – (स्व) हा हतोऽस्मि रामेण ! यदि प्रत्याख्यामि क्रूर एष रावणः सद्यो मां हन्ति । (प्र) करिष्यामि तत् ।

राव – आगम्यताम् । गच्छावस्तावत् । (इति निष्क्रान्तौ)
(रङ्गमध्ये यवनिका पतति ।)

द्वितीयं दृश्यम्

(रङ्गमध्ये यवनिका अपस्रियते । आश्रमस्थौ सीतारामौ प्रविशतः ।)

रामः – सीते ! सान्द्रस्तुहिनपातोऽस्मिन् दिनमुखे । तुषारच्छन्नमण्डलो मन्दप्रकाशो रविश्चन्द्रायते । सर्वो लोको हिमार्दितः स्तब्धवल्लक्ष्यते । तिरस्करिण्या आवृतमिव दृश्यते रोदोऽन्तरम् ।

सीता – आर्यपुत्र ! अथ वत्सरकालः अस्माकमवशिष्यते वनवासक्लेशस्य । वर्षादूर्ध्वं पितुर्निदेशं पूरयित्वा कृतकृत्यः अयोध्यां निवर्तिष्यसे शीतातपसहनक्लेशं सर्वमचिरादेव विस्मरिष्यसि प्राप्तराज्यो बन्धुसंयुतश्च ।

रामः – सीते ! मैवं भण । यथा अयोध्यायां जनपरिवृता अमोदामहि तथा अरण्ये मृगवृक्षाणां च मध्ये प्राप्नुमः संमोदम् । ममैते पर्वताः काननानि तरङ्गिण्यो जन्तवः पक्षिणश्च तथा खलु आत्मीयाः संवृत्ता यथा भूयोऽपि चतुर्दशसमा वनवासं कर्तुमुत्सहे ।

सीता – अहमपि अरण्येषु सम्मोदमनुभवेयं यदि रक्षसां भीतिर्न स्यात् । अनुक्षणं राक्षसभयेन न निर्वृतिमुपगच्छति मम हृदयम् । शृणु ।

पर्वतं च प्रवाहं च वृक्षं कुञ्जं स्थलं वियत् ।
रक्षःपरीतमूहेऽहं यद्यत् पश्यामि कानने ॥

रामः – सर्वदा अहं तव सन्निहितोऽस्मि यतो नैवं भेतुमर्हसि । सुप्तयोरावयो रक्षणे जागरूकस्तिष्ठति लक्ष्मणः ।

सीता – भ्रातृवत्सलो देवरो नितान्तमात्मानं खेदयति आवयोः सेवायां निरतः ।

रामः – सीते श्रूयतामेष भूतार्थः ।

बह्व्यो भवेयुर्वनिताः प्रपञ्चे
या नो त्यजेयुः पतिमापदासु ।
अनुत्सृजन्तः सहजं विपत्सु
सौमित्रितुल्या विरला भवन्ति ॥

अन्यश्च मम भाग्यविशेषो यदिह सन्निहितो लक्ष्मणो यथा मां सेवते तथा तत्रायोध्यायां भरतश्च ।

(ततः प्रविशति जलपूर्णं घटं स्कन्धे वहन् लक्ष्मणः ।)

लक्ष्मणः – (घटमधो विन्यस्य) भरतमुद्दिश्येव संलापः श्रूयते ।

रामः – अथ किम् । अस्मिन् हेमन्तप्रभाते यथा वयं वनवासिनो नद्यां शीतजले अवगाहामहे विमुक्तभोगो गृहीतव्रतो भरतश्च तथा सरय्वा हिमजले स्नानक्लेशं सहत इति ।

लक्ष्मणः – लोकोत्तरो भरतस्य त्यागगरिमा । बहुयज्ञदिग्विजयादिभिरस्मत्पितामहप्रपितामहैर्यावद्यश आर्जितं तावतः अधिकमार्जितं भरतेन राज्यविसर्जनेन । लोके भोगात् त्यागः अतिरिच्यते । जगति नरो गुरुणो वस्तुनो विसर्जनेन यथा महान् भवति न तथा तस्य सम्पादनेन ।

निवेश्य तव पादुके नरवरासने काञ्चने
निवेद्य च विनीतिमान् सकलकार्यजातं तयोः ।
जटी च धृतवल्कलो नियमधारणो भूशयः
विमुच्य नृपसम्पदं वहति भृत्यभावं स्वयम् ॥

अपि च ।

जननीमनु वासना गुणा
मनुजानामिति लौकिकी श्रुतिः ।
अवदातचरित्रकर्मभि-
र्भरतेन ध्रुवमन्यथा कृता ॥

अये विधातुः सृष्टेर्वैषम्यम् । यस्याः पुत्रो भरतः पतिश्च दशरथः कैकेयी सा कथं नामैवं पापनिश्चया

अभवत् । स्वयमनुभूतमपि असत्यमिवाश्रद्धेयमिव चाभातीदं वैपरीत्यम् ।

रामः – मा तावत् । ननु भरतस्योदारचरितेनारभ्य मातुः कैकेय्या निन्दायां किं परिणमयसि ते अर्थवादम् ? तदेव भरतस्य वृत्तं वद । न युज्यते ते मातृगर्हणम् ।

सीता – (यावत् परिक्रम्य पुरत आगम्य) अहो आर्यपुत्र ! इत इत आगच्छतु भवान् । अपूर्वोऽयं मृगो दृश्यते । पश्यतु । लक्ष्मण ! त्वमपि पश्य । अहो रामणीयकमस्य हरिणस्य ! अहो मृगस्याङ्गप्रत्यङ्गसन्निवेशचारुता ! अहो वर्णव्यतिकरः !

(रामलक्ष्मणौ परिक्रम्य मृगदर्शनं नाटयतः ।)

रामः – अहो विस्मयावहो हरिणस्य वर्णसन्निवेशः । स्वर्णमयमिव राजते वपुः । रत्नद्युतयो बिन्दवश्चकासति । इन्द्रनीलमणिरुचिं विकिरति नयनयुगम् ।

सूर्यांशुतारकागण-
चन्द्ररुचां समुपचितः समवायः ।
धृत्वा हरिणाकारं
भासयतीवेमं वनदेशम् ॥

लक्ष्मणः – सर्वथा विस्मयावहास्य मृगस्य देहकान्तिः ।

सीता – हरति मम मनो मृगस्याकृतिविशेषः। आर्यपुत्र ! अनेन हरिणेन क्रीडितुमिच्छामि। अयोध्यायामन्तःपुरे विनोदं मे जनयिष्यति। आनय एनं मृगम्।

लक्ष्मणः - अदृष्टपूर्व ईदृशो विभासमानचित्रकर्बुरो मृगः। न किञ्चिदन्यद् हरिणजातीयकं सत्त्वममुमुपसर्पति। भवेदसौ कश्चिद् राक्षसो मायामवस्थितो हरिणाकारः। सन्देहास्पदे कर्मणि न प्रवर्तितव्यम्।

सीता – एवं नाम गुणोत्कर्षोऽपि दोषारूढः क्रियते जनेन। आर्यपुत्र ! ननु नानयसि अमुं मृगं यो मम मन आहरति दृष्टिं च विलोभयति ? यदि जीवन् न गृह्यते हत्वा आनीयताम्। विचित्रवर्णे तच्चर्मणि उपवेष्टुमिच्छामि। न जाने युज्यते न वा एषोऽभिलाषो, मम तु सकलापि चेतना अनया मृगगात्रशोभया बलवद् ह्रियते।

रामः - लक्ष्मण ! आनय धनुः। तव भ्रातृजायाया मनोरथं पूरयिष्यामि। यदि जीवन् मां प्रतारयिष्यति असौ मृगः तदा हत्वा आनेष्यामि। (लक्ष्मणो धनुर्बाणानानीय ददाति।) यावदहं प्रत्यागमिष्यामि अवहितो रक्ष सीताम्। (निष्क्रान्तः)

(रङ्गमध्ये यवनिका पतति। ततः प्रविशति हरिणानुपाती रामः।)

रामः – आः ! प्रतारयत्यतीव मामयं मृगहतकः । क्षणं निकषा दृश्यते दूरे च क्षणान्तरे । इतो गृह्यमाण इव लक्ष्यते ततः शीघ्रं प्रयाति । अनुधावितो वायुवेगेन विद्रवति । सुदूरं नीतोऽस्मि । आः ! वृक्षपार्श्वे अन्यतोदृष्टिः शेते । बाढम् । मन्दं मन्दं निभृतमुपक्रम्य गृह्णामि । (इत्येवं परिक्रम्य) हा धिक् । अगृहीतः कन्दुकवदुत्प्लुत्य दूरं गतः । हन्त । विषण्णोऽस्मि व्यर्थैः प्रयत्नैः । गृहीत्वा आनयेति सीताया अभिलाषः । न तु गृह्यतेऽसौ दग्धमृगः । भवतु हनिष्याम्यमुम् । (इति शरप्रयोगं नाटयति । हा सीते ! हा लक्ष्मण ! इति आर्तनादः श्रूयते ।) किमिदमाश्चर्यम् । हतो मृगो राक्षसविग्रहोऽभवदपतच्च । खलः स मृगो नूनं मायावी राक्षसः । पूर्वमेव सम्यगूहितं लक्ष्मणेन । म्रियमाणस्य हा सीते हा लक्ष्मण इत्याक्रोशो मां शङ्काविलं करोति व्याकुलयति च । तूर्णमहमाश्रमं गत्वा सीतां लक्ष्मणं च कथयामि यथावृत्तम् । (इति निष्क्रान्तः)

(रङ्गमध्ये यवनिका अपसार्यते । प्रविशति सीता लक्ष्मणश्च । नेपथ्ये हा सीते हा लक्ष्मण इति श्रूयते ।)

सीता – (यतो ध्वनिरागतस्ततो गत्वा सम्भ्रमेण) अत्याहितमत्याहितम् । ननु लक्ष्मण शृणोषि हा सीते हा

लक्ष्मण इति राम आक्रोशति । नूनं रामो राक्षसैर-भियुक्तो बाध्यते । शीघ्रं गत्वा रक्ष ते भ्रातरम् ।

लक्ष्मणः – आर्ये ! मा विभीहि । रामो न कदाप्येवमा-क्रोशति अनेकैरप्यभियुक्तः । बहूनि मायाविलसितानि विचित्राणि प्रादुर्भवन्ति अरण्ये । अव्याकुला भव यावन्मे भ्राता आगच्छति ।

सीता – हा दुर्विधे ! किं करोमि । हन्यते मम पतिः राक्षसैः एष न गच्छति रक्षितुम् । भो मम दैवतानि रामं रक्षत ।

लक्ष्मणः – आर्ये मैवं चिन्तय । अप्रधृष्यो भवत्याः पतिः ।

सीता – गच्छ शीघ्रं लक्ष्मण । भ्रातरं त्रायस्व । न ते युज्यते एवं तूष्णीं स्थातुं हन्यमाने भ्रातरि । मम वचनाद् गच्छ । प्रतिष्ठस्व सपदि ।

लक्ष्मणः – भवति ! नियुक्तोऽस्मि तव रक्षणे भ्रात्रा यावत् स आगमिष्यति । अतो न गन्तव्यं मया त्वामेकाकिनीं विहाय । मा पर्याकुला भव । न किमपि भवति रामस्य ।

सीता – श्रुतमार्तनादं भ्रातुर्न गणयसि मम विपत्तिमूहसे । हा धिक् हा धिक् । भ्रातुर्विनाशमीहसे । ज्ञात इदानीं ते आशयः । मयि प्रच्छन्नाभिलाष आवामनुसरसि

अन्तरं प्रतीक्षमाणः । भ्रातरमुत्सीदन्तमुपेक्षसे । धिक् कपटिन् । नाहं ते वशं गमिष्यामि । अग्नौ पतेयं जले निमज्जेयम् । अपेहीतः । राम क्वासि । देव इन्द्र रक्ष मम पतिम् । देव वरुण त्रायस्व मम भर्तारम् ।

लक्ष्मणः – (कर्णौ पिधाय) नैवं मां वक्तुमर्हस्यार्ये । असहनीयं ते अभिशंसनम् । एषोऽहं गच्छामि यदादिशति भवती । अधुना आत्मनैव भवती संरक्षणीया । देवास्ते श्रेयो विदधतु । (इति निष्क्रान्तः)

(ततः प्रविशति परिव्राजकवेषो रावणः ।)

रावणः – (स्व) अहो म्रियमाणस्यापि मारीचस्य बुद्धिचातुर्यं येन रामलक्ष्मणावुभावपि अपनीतौ कुटीरात् । मित्रस्यानेन परमेण साहाय्येन आजीवितान्तं तस्याधमर्णः सञ्जातोऽस्मि । बाढम् । सीतां हरिष्यामि यदि स्वयं मां नाङ्गीकरिष्यति । कुटीरनिकटं प्राप्तोऽस्मि । ननु व्याहरामि (प्र) एषोऽस्मि भोः !

सीता – (परिक्रम्यावलोक्य स्व) पूज्या एते भगवत्पादाः । समुदाचारं निर्वर्तयामि । (प्र) आर्य ! स्वागतं भवते । इदमर्घ्यमिदं पाद्यम् । अत्र बृस्यामुपविशतु आर्यः ।

रावणः – स्थीयतां समुदाचारः। भिक्षां देहि ललने तावद् गच्छामि।

सीता – आर्यः कुत आयाति कुतो वा गच्छति ?

रावणः – दक्षिणत आगतोऽस्मि पवित्रे गोदावरीतीर्थे स्नातुम्। निर्वर्तितः पुण्योऽभिषेकः। पुनस्तत्र गच्छामि। सुन्दरि! का त्वम् ? एकाकिनी किमर्थमस्मिन् घोरेऽरण्ये वससि। अहो तव रूपातिशयः। आहरसि मे मनश्चारुभिस्सर्वैरङ्गैः।

सीता – (स्व) अनुपपन्नमिदं भाषणं परिव्राजकस्य। भर्ता देवरश्चासन्निहितौ। भयान्मे वेपते हृदयम्। किं वच्मि। भवतु। एवं ब्रवीमि। (प्र) आर्य ! मिथिलाया राज्ञो जनकस्य दुहिताहम् अयोध्यापतेर्दशरथस्य स्नुषा रामस्य धर्मपत्नी नाम्ना सीतेति। पितुराज्ञया मे पतिः ससोदरः चतुर्दशवर्षाणि वनेषु वसति। अहं च मम भर्त्रा सहागता। गतौ तावाखेटके अचिरेणागमिष्यतः। विश्राम्यतु भवानस्माकमातिथ्यं चाद्य स्वीकुरुताम्।

रावणः – अयि रमणि ! यावत् त्वं भाषसे तावत्तवारुणयोरोष्ठयोर्दन्तमौक्तिकसितरुचिर्मसृणं प्रसरति।

मुखे तव कपोलयोः श्रवणभूषणे राजतः
गले मणिमरीचिभिर्ज्वलति लम्बमानः सरः ।
कुचोन्नततटे परिस्फुरति रत्नहारस्तथा
मनोज्ञवपुरञ्चितं लसति पीतकौशेयकम् ।।

तव संसर्गेण सर्वं शोभते । किन्तु केनापि अपराधेन वा असमर्थ इति वा पित्रा निर्विषयीकृतस्तव भर्तृगन्धिको रामस्तु न ते सदृशः ।

सीता – अलमेभिः कुवचनैः । तिष्ठ वा गच्छ वा । मा कुटिलं भण ।

रावणः – अयि सुकुमारि । नार्हसि वनवासक्लेशम् । नगरे हर्म्येषु वासमुद्यानेषु विहारं चार्हसि । श्रूयताम् । अहं लङ्कायाः राजा विख्यातापदानो रावणः । मां भजस्व । त्यज दीनं वनचरं रामम् । मया सह लङ्कामायाहि । मम प्रियतमा पत्नी भव । सर्वभोगांस्ते दास्यामि ।

सीता – अपेहि राक्षसापसद । यावन्मम भर्ता नागच्छति तावदितो याहि । नो चेन्मरिष्यसि ।

रावणः – ललने न जानासि मम बलपराक्रमवैभवानि । सुविख्यातः अहं रावणः । त्वयि मे रागो जातः । मयि प्रसीद । मम भार्या भव । विसृज वराकं रामम् ।

मया सहागच्छ । बहुदासीभिः सेव्यमाना लङ्कायां मम मनसश्च अधिष्ठात्री भव ।

सीता – अवाच्योऽसि । अपसर जाल्म ।

रावणः – एतावत् प्रार्थितापि त्वं यदि मां भजसे न हि ।
प्रसभं ह्रियसे भद्रे गरुडेन सुधा यथा ॥

(इति सीतामूर्वोर्गृह्णाति । यवनिका पतति ।)

— —

द्वितीयः अङ्कः

प्रथमं दृश्यम्

(ततः प्रविशतो विजयविलासौ नाम द्वौ सिद्धौ ।)

विजयः – या मानवस्य प्रकृतिराप्राणान्तं तथैव सा ।
यथा रूपं तथा चेतो नात्यन्तं परिवर्तते ॥

विलासः – किमिति किमिति ? ननु वयसा रूपं विद्याव्रत-तपोभिर्मनश्च न परिवर्तते ?

विज – परिवर्तते न तु साकल्येन अन्यथा भवति । किञ्च । मृतस्य म्रियमाणस्य च सुमहदन्तरं भवति । मृतो मानवभावानामतीतः प्रशमं गतः । क्षणान्तरेऽपि

म्रियमाणो रागद्वेषादिषु मानवमनोविकारेषु निमग्न-स्तिष्ठति न च मनागपि प्रशान्तिं लभते । अतो दुष्ट-स्वभावो जनो मृत्युना गृह्यमाणोऽपि स्वां दुष्टप्रकृतिं न जहाति ।

विला – प्रमाणं तत्रोच्यताम् ।

विज – खलो रावणमित्रं मारीचः प्रव्रजितस्यापि यस्य मन-श्शान्तिर्नाभवत् । रामशरभिन्नदेहो मृत्योरासन्नः सन् स्वां दुष्टप्रकृतिं रामे विरोधं च नाजहात् हा सीते हा लक्ष्मण इति आक्रुश्य अम्रियत यतो रावणेन सीता अपहृता ।

विला – स खलु रावणाद् भीतः तथा आक्रोशत् ।

विज – मुमूर्षोः का भीतिः? न सा रावणाद् भीतिः । स्वीयैव प्रकृतिः ।

विलाः – तिष्ठतु नामैषा स्वभावचर्चा । रामस्य का नामा-वस्था ?

विजयः – पश्य पश्य स्वयमेव पश्य ।

(इति परिक्रम्य रङ्गस्य एकस्मिन् पार्श्वे तिष्ठतः । ततः प्रविशतः रामलक्ष्मणौ ।)

रामः – न युक्तं कृतं लक्ष्मण सीतामसहायामाश्रमे विहायागतेन त्वया। उद्विजते च मनो राक्षसजालमस्य कपटाक्रोशेन। एहि शीघ्रमाश्रमं गच्छावः। (रामलक्ष्मणौ परिक्रामतः।) अयमस्माकमाश्रमः। किं नु खलु सीता वहिर्न दृश्यते आवयोः प्रतीक्षमाणा? अङ्ग। भयादन्तः प्रविष्टा भवेत्।

(रङ्गमध्ये यवनिका अपस्रियते। अन्तराश्रमो दृश्यते।)

रामः – सीते! (इति त्वरया अन्तर्गत्वा वहिर्निर्गम्य) लक्ष्मण! शून्य इदानीमाश्रमः। भक्षिता सीता राक्षसैः। सीते! (इति उच्चैराक्रोशति।) न लभे प्रतिवचनम्। आं ज्ञातम्। सीते! क्वापि निलीनासि। अलं दारुणेनानेन परिहासेन। असकृदुक्तासि मैवं परिहसितुम्। नितरामुद्विग्नोऽस्मि। अयि कठिने प्रार्थये, दर्शयात्मानं झटिति। लक्ष्मण! नैतावन्मामुपेक्षते सीता। नूनमत्र सा नास्ति। गोदावरीं गच्छ। तत्र पश्य। अथवा त्वमत्र तिष्ठ। अहमेव गत्वा ज्ञास्यामि। (इति निष्क्रम्य प्रविश्य) न पश्यामि सीतां गोदावरीप्रान्ते। सीते क्वासि? अपि जीवसि? त्वामपश्यन् उन्मत्तो भवामि। सीते! सीते! देहि मे प्रतिवचनम्। (इति विलपति।)

लक्ष्मणः- भ्रातः ! भवादृशस्य न युज्यते इत्थं विलपितुम् । धैर्यं वह । प्रजावतीमन्विष्याव: । ध्रुवं प्राप्नुवः । (इति रामलक्ष्मणौ निष्क्रान्तौ । रङ्गमध्ये यवनिका पतति ।)

विजय:–अहो वत सीतामपश्यतो रामस्य शोकावेगः ।

उन्मादीव तरोस्तरुं द्रवति तत्पश्चाद्दरीदृश्यते
आरुह्य द्रुमशेखरांस्तदटवीदेशान् मुहुर्वीक्षते ।
नैव क्वापि विलोक्यते जनकजेत्यार्त्या निषीदत्यधो
भ्रातुर्हस्तमथावलम्ब्य विवृतोद्वेगं शनै रोदिति ॥

विलासः – मूर्तीभूतः शोको रामोऽधुना । अथ रावणः सीतां कथं नीतवानिति ज्ञायते ?

विज - ज्ञायते । बलाद्रथे आरोप्योच्चैराक्रोशन्तीं सीतामपहरन् रावणो जटायुना प्रतिरुद्धः । हतस्तस्य सारथिः रथश्च भञ्जितः । रावणस्य खड्गप्रहारेण जटायुर्मृतप्रायः पपात । अथ पुना रुदती मां विसृज न युज्यते ते परस्त्रीहरणमिति परिदेवयन्ती बलान्नीयमाना तत्र तत्रैकैकमाभरणं विमुच्य भूमौ सा अपातयत् । ऋष्यमूके पर्वते पञ्च वानरान् सा अपश्यत् पटाञ्चलं छित्वा आभरणानि सम्बद्ध्य तत्पर्वतसमीपे व्यसृजत् रावणस्तन्न दृष्टवान् । लङ्कां नीता सा रावणेन स्वीयानि भवनानि उद्यानानि सम्पदश्च

दर्शयित्वा सपादप्रणामं मम पत्नी भवेति बहु प्रार्थिता तं धिक्कृत्य प्रत्याचख्यौ । स तामशोकवने विन्यस्य तस्या रक्षणे राक्षसीः न्ययुङ्क्त ।

तस्याज्ञया जनकजामसुराङ्गनास्ता
रक्षन्ति रावणकथा मधुरं ब्रुवन्ति ।
कालक्रमेण वनिता मयि रज्यतीति
तस्याः प्रसादमनुनित्यमपेक्षते सः ।।

विला – मनुजः कामेन वामः क्रियते ।

अनुक्तो न जहातीहां दुरुक्तो न प्रशाम्यति ।
प्राज्ञोऽप्यज्ञायते कामी अविवेकी मृगायते ।।

भवतु। रामलक्ष्मणौ पुनः किं व्यवसितौ ?

विजयः–अनन्तरं तौ तामन्विष्यन्तौ वने परिभ्रमन्तौ रुधिरपूर्णदेहमासन्नमरणं जटायुमपश्यताम् । महतापि प्रयत्नेन जटायुः किमपि वक्तुं नाशक्नोत् केवलं शिरःकम्पेन दक्षिणां दिशं सूचयित्वा अम्रियत । तस्य देहसंस्कारं कृत्वा रामः सानुजः सीतामन्विष्यन् दक्षिणेन अगच्छत् । तत्र कवन्धेनाहारार्थं प्रतिरुद्धौ तमखण्डयताम्। स्ववृत्तान्तमुक्त्वा सीतां प्राप्तुमुपायं तमपृच्छद् रामः । सुग्रीवो नाम वानरनायको भ्रात्रा वालिना निष्कासितः चतुर्भिर्मित्रैः सह ऋष्यमूकपर्वतमधिवसति तेन सह

स्नेहः क्रियतां, स सीतां विचेष्यति तस्याः प्रापणे तव परिपूर्णं साहाय्यं करिष्यतीति च कबन्धः अवदत्। रामलक्ष्मणौ प्रस्थितौ मार्गे शबर्या आतिथ्यं स्वीकृत्य पम्पामतिक्रम्य ऋष्यमूकं प्राप्नुताम्। तदा सुग्रीवो मित्रैः साकं तत्पर्वतकटके विचरति स्म।

विलासः – हन्त आशा उदेति। तत्रैव गत्वा द्रक्ष्यावो यद् भविता।

विज – एवं कुर्वः। साधयावस्तावत्। (निष्क्रान्तौ)

(ततः प्रविशति सुग्रीवो हनुमान् मैन्दो द्विविदो जाम्बवांश्च। प्रथमे चत्वारो वानराः। ते पर्वतवासिनो मानवाः। पुरुषा वस्त्रधारणे पश्चात्तद् वालाकरेण लम्बमानं कुर्वन्ति ततो वानरा इति अभिधीयन्ते परिसरनिवासिभिः। जाम्बवान् ऋक्ष इति आटविकः।)

सुग्रीवः–भो मित्र हनुमन्! मित्र जाम्बवन्! न पश्यास्यवसानाशां मम जीवितक्लेशस्य।

मृग इव सहे वात्यां हैमं प्रचण्डतमातपं
गिरितटनितम्बाभोगेषु भ्रमामि प्रमत्तवत्।
व्रतिवदवनौ निद्राभ्यासे गुहास्ववधूतवद्
विगतविभवो भार्याहीनो दिनान्यतिवाहये॥

सर्वमिदं ज्यायसि सोदरे मम कृतस्य गौरवस्य संमानस्य च फलं न तु स्वस्य दोषस्य ।

जाम्ब – स्वामिन् ! सत्यमभिहितं भवता । यथा वाली त्वयीदानीं समाचरति तथा यदि तस्मिन् तदा प्रावर्तिष्यथाः तवेदृशी अवस्था नाभविष्यत् । अथवा साध्विदमुच्यते ।

यो यादृशस्तस्य तथैव कुर्याद्
भ्रातुः पितुर्वा यदि वा सुतस्य ।
भक्तिश्च वात्सल्यमथानुरागो
दुष्टे कृतो दुष्फलितं प्रसूते ॥

हनु – मा मा अत्यन्तं विषीदतु भवान् । भवता विनयगुरुः समुदाचारः कृतो ज्यायसि सोदरे । यद्यन्यथा कृतस्तेन युवयोरन्तरं हि तत् । भवता क्लेशानुभवोऽङ्गीकृतश्चरित्ररक्षणाय ।

रक्ष्यमाणं चरित्रं न व्ययमाप्नोति कर्हिचित् ।
राज्यं धनं प्रभुत्वं वा न तिष्ठति सुरक्षितम् ॥

श्रूयतां मया अधिगता प्रवृत्तिः । सम्प्रति किष्किन्धायां पक्षद्वयं वर्तते । सर्वाः प्रकृतयस्त्वयि गुणवति स्निह्यन्ति । मन्त्रिणः सेनान्यश्च केचन तव पक्षपातिनः केचिद् वालिनश्च । तवैव पक्षीया ज्यायांसस्ते च

दिने दिने अभिवर्धन्ते । किन्तु सर्वं वालिनो बिभ्यति । सर्वे राजपुरुषाः प्रजाश्च वालिनो भयादेव चेष्टन्ते न गौरवात् प्रेम्णा वा ।

व्याप्नोत्येको यथा विश्वं प्रज्वलन्मण्डलो रविः ।
स्वीयप्रतापेन तथा किष्किन्धां शास्ति तेऽग्रजः ॥

अतोऽस्माभिः कालस्य प्रतीक्षा कर्तव्या वालिसूर्योपरागस्य ।

सुग्री - (दूरे दर्शनं नाटयन्) मित्र जाम्बवन् ! अपि पश्यसि द्वौ पुरुषौ दृश्यमानावित आगच्छन्तौ ?

जाम्ब – अथ किम् । किञ्चित्कालात्तौ पश्यामि अस्मद्दिशि उपक्रममाणौ । अधुना चापधरौ युवानौ स्पष्टमभिलक्ष्येते ।

सुग्री - हनुमन् ! त्वमपि निर्धारय कौ तौ भवेतां किमर्थं तयोरागमनं स्यात् । जाम्बवन् ! त्वं कथं मन्यसे ?

जाम्ब – यथा तौ नेतस्तत आहिण्डेते निर्दिष्टेनेव पथा अस्मदभिमुखमायातः तथा तर्कयामि केनापि प्रेषितावित आगच्छत इति । भवतु आगच्छेताम् । ज्ञास्यामः ।

सुग्री – तौ वीरौ वालिप्रेषितौ मां हन्तुमागच्छत इति तर्कयामि । हनुमन् ! यावत्तौ नागतौ तावदन्यतोऽपगन्तव्यमस्माभिः ।

हनु – स्वामिन्! अन्यस्या दिश आयातस्तौ न किष्किन्धायाः। वालिना प्रेषिताविति कथं तर्कयसि ? अपि च ऋष्यमूकात् कुत्र वा गच्छामः ?

सुग्री – तर्हि किं करणीयं चिन्तयसि ?

हनु – सम्प्रधार्यतामिदम्। नूनं तौ चापासिधरौ वैदेशिकौ। मत्वापि वालिप्रेषितौ तौ वयमस्मत्पक्षे परिवर्तयितुं प्रयतिष्यामहे।

सुग्री – भवतु। यावत्तौ नात्यन्तसन्निकर्षमायातस्तावत्त्वमभिगम्य सम्भाष्य जानीहि किमर्थं तयोरागमनमिति।

जाम्ब– प्रथमः कल्पः।

हनु – बाढम्। एवं ज्ञास्यामि। (इति निष्क्रान्तः)

जाम्ब – मित्र सुग्रीव ! गतो हनुमान् तयोः समीपं ताभ्यां सह सम्भाषते च। यतः अस्मदभिमुखीभूय अस्मद्दिशि पुनः पुनः पश्यन् मुखेन हर्षं सूचयन् भाषते ततस्तर्कयामि तावस्माकमनुकूलाविति। इदानीं ताभ्यामनुगम्यमानो निवर्तते हनुमान्। (हनुमान् रामलक्ष्मणाभ्यां सह प्रविशति।)

हनु – जयति जयति सुग्रीवः ! राजन् ! अयं कोसलानां राज्ञो दशरथस्य पुत्रो रामः अयं च तस्यावरजो भ्राता

लक्ष्मणः। एतौ तव मित्रत्वमपेक्ष्यायातौ। भो रामलक्ष्मणौ ! एप सुग्रीवः अस्मत्प्रभुः।

रामः – आर्य अभिवादये।

लक्ष्मणः–अभिवादये वानराणां प्रभुम्।

सुग्री – अभिवादये।

हनु – राजन् ! श्रुतं किलास्माभिर्यद् राजा दशरथो ज्येष्ठं पुत्रं राममभिषेक्तुमुपक्रान्तो भार्यास्वन्यतमया प्रतिरुद्धस्तस्याः प्रेरणया तं वनं प्राहिणोदिति। स एष राम उपागतः।

सुग्री – भो राम भो लक्ष्मण ! स्वागतं युवाभ्याम्। उपविशतम्। मार्गखेदमपनयतम्। मैन्द ! जलमानय। द्विविद ! फलान्युपहर।

रामः – भो राजन् ! अलं सपर्यया। भवतो दर्शनादेवावयोर्मार्गश्रान्तिर्गता। लक्ष्मण निवेदयास्मत्प्रवृत्तिं वानरराजाय।

लक्ष्मणः–राजन् श्रूयताम्। एवं वनं प्रेषितो रामो भार्यया मया भ्रात्रा चानुगतः। यत्कृते अस्माकं मातृषु अन्यतमा कैकेयी रामं वनं प्रेषितवती स भरतो नाम

तस्याः पुत्रो राज्यं निराकृत्य राममेव निवृत्य तत् स्वीकर्तुं प्रार्थयत। परन्तु रामः पितुर्निदेशं पूरयितुं निश्चितवान्। भ्रातुरादेशेन भरतः अयोध्यां न्यवर्तत तस्यैव प्रातिनिध्यं धृत्वा राज्यं पालयति च तन्निवर्तनावधि। वनेषु निवसतामस्माकं त्रयोदशवत्सरा व्यतीता एकोऽवशिष्टः। गोदावर्यास्तीरे एकस्मिन् दिने आवयोरसन्निहितयोराश्रमान्मम भ्रातुः पत्नी केनाप्यपहृता अभवत्। तामन्विष्यन्तौ आवामत्रागतौ। दक्षिणया दिशा सा नीतेतिमात्रा प्रवृत्तिरुपलब्धा।

रामः – कबन्धेन सूचितावावां भवान् तस्या अधिगमे साहाय्यं करिष्यतीति। आवामागतौ भवतो मित्रत्वं साहाय्यं चापेक्षमाणौ।

सुग्री – कियान् कालः सञ्जातो भवतो भार्याया अपहृतायाः?

रामः – त्रयो मासा व्यतीताः।

सुग्री – हनुमन्! किमिव त्वं मन्यसे?

हनु – मासत्रयात्पूर्वं कापि स्त्री केनापि दक्षिणतः अपह्रियमाणा दूराद् दृष्टा मैन्देन। अनन्तरं च पर्वतसमीपे भूषणानां वस्त्रग्रन्थिरुपलब्धः किलास्माभिः।

सुग्री – अनीयतां ननु स ग्रन्थिः ।

हनु – बाढम् । (इति निष्क्रम्य ग्रन्थि गृहीत्वा प्रविशति ।)

सुग्री – भो राम ! पश्यतु भवानस्मद्दृष्टानि भूषणानि ।

रामः – (ग्रन्थिं विमुच्य दृष्ट्वा स्व) हा सीते ! एतान्येव ते अधुना पश्यामि । बाष्पोपरोधेन न सम्यक् पश्यामि च । (प्र) लक्ष्मण ! पश्य । (लक्ष्मणः पश्यति ।) मित्र सुग्रीव ! बहूपकृतं भवता येन मम भार्याया भूषणानि चिरादहं पश्यामि ।

लक्ष्मणः–मित्र सुग्रीव ! प्रवृत्तिमनुपलभ्य नैराश्यमग्नयोरितस्ततः परिभ्राम्यतोरावयोराशाग्रन्थिरिव भवता दर्शित एव सीताया आभरणानां ग्रन्थिः ।

रामः - भवदधीनमिदानीं मे जीवितम् ।

सुग्री – मा विषीदतु भवान् । भवतो भार्यायाः प्रवृत्तिं वयमुपलप्स्यामहे । दिष्टचा संघटितौ तुल्यावस्थावावाम् । ममापि जीवितार्तिमपनेतुं प्रभवति भवान् । ज्यायसा भ्रात्रा विनिकृतो हृतदारः शोकमग्नः पर्वते चराम्यहम् । श्रूयतां विस्तरत आवयोर्वैरकारणम् । क्रियतां च गुणदोषनिर्णयः । अस्माकं पितुरनन्तरं मम ज्यायान् भ्राता वाली महाबलपराक्रमशाली राजा अभवत् ।

अहं च सर्वदा तस्य वशंवदः। तस्य मायावीति राक्षसेन स्त्रीनिमित्तः कलहः अभवत्। एकदा मध्य-रात्रे मायावी राजभवनाभिमुखं स्थित्वा वालिनं युद्धार्थमाह्वयत। तस्य गर्जितं श्रृण्वन्नेव स्त्रीभिर्मया च निवार्यमाणोऽपि वाली निरयात् तमनु अहं च। आयान्तौ नौ द्वौ दृष्ट्वा भीतो मायावी प्राद्रवत् तमनुद्रुतो वाली तं चाहमन्वसरम्। प्रधाव्य प्रधाव्य भूम्यां स्थितं तृणावृतं बिलं मायावी प्राविशत्। बहुधा मया प्रार्थनैर्निवार्यमाणोऽपि यावदहं तं हत्वा आगमिष्यामि तावत् त्वमत्रैव तिष्ठेति मामाज्ञाप्य वाली तस्यां गुहायां प्राविशत्। बहवो दिवसा गता भ्रातरमहं नापश्यम्। अनन्तरं सहसा राक्षसानां सिंहनादा वालिनो हीनस्वरश्च मया श्रुताः। वाली हत इति निर्धार्य राक्षसेभ्यो भीतोऽहं बिलद्वारं महा-शिलया पिधाय मार्ग एव मृतस्य भ्रातुर्जलाञ्जलिं दत्वा किष्किन्धां प्रत्यागच्छम्। यद्यपि कस्यापि न तद् वृत्तमवदं तथापि मन्त्रिभिर्ज्ञातं राज्यस्याराजक-भयेनाहमभिषिक्तश्च। अस्माकमाचारस्यानुसारेण भ्रातृजाया च मां प्राप्तवती। अथानन्तरमेकस्मिन् दिने वाली राक्षसान् हत्वा प्रत्यागतवान्। विधेयेन मया छत्रं चामरं सर्वं च राजचिह्नं तस्मै प्रतिपाद्य, तव प्रातिनिध्येन धृतं सर्वं स्वीकुरु, राज्यं शाधि इति पादपतितेन मया प्रार्थितः कोपेन मां विधूय मन्त्रिणः

अबध्नात् । यद्यप्यहं तदा तस्य निग्रहे समर्थ आसं तथापि भ्रातृगौरवात्तस्यावलेपमसहे । अनन्तरं स मामेकवस्त्रेण निरवासयत् मम भार्याञ्च अपाहरत् । भार्यया राज्येन च वियुक्तो यत्र यत्राहं गच्छामि तत्र तत्र वाली मामनुपत्य पीडयति स्म । अन्तेऽहमिमम्-ऋष्यमूकमावसामि यत्र वाली नायाति । तत्र च कारणमस्ति । एकदा दुन्दुभिर्नाम् राक्षसो मायाविनो भ्राता बलगर्वितो वालिनं द्वन्द्वयुद्धायाकारयत् । उभौ नियुद्धं कुर्वन्तौ इहापततां यत्र महर्षेर्मतङ्गस्याश्रमोऽस्ति । अत्र वाली दुन्दुभिं हत्वा मृतदेहं प्राक्षिपत् स च मुनेराश्रमसमीपेऽपतत् । मृतदेहेन दूषितमाश्रमस्थलं दृष्ट्वा क्रुद्धो मतङ्गो वालिनं कदापि ऋष्यमूकं मागच्छेति शशास, मुनेर्भीत्या वाली इह नायाति । अनन्तरं मां हन्तुं वालिना वहवो वानराः प्रेषिताः परन्तु सर्वे ते मया निहताः । अतो यः कोऽपि इहायाति तं वालिप्रेषितमहं मन्ये । राम ! श्रुतमावयोर्वैरकारणं भवता । अधुना भवदधीनमस्ति मम क्लेशापनयनम् । यावन्मे भ्राता वाली न हन्यते तावन्मे शोकस्यावसितिर्न विद्यते ।

रामः – मित्र सुग्रीव ! (दक्षिणहस्तं प्रसार्य ।)

गृह्यतामनुरागेण स्नेहहस्तः प्रसारितः ।
प्रसार्यतां च ते हस्तस्तुल्यस्नेहेन दक्षिणः ॥

(इत्युभौ परस्परं दक्षिणपाणी गृह्णीतः ।)

सुग्री – कृतः प्रणयः । मित्र हनुमन् ! संधुक्ष्यतामग्निर्यः साक्षी भवेदावयोर्दृढस्नेहस्य ।

रामः – एवं क्रियताम् ।

हनु – तथा । (इति निष्क्रम्याग्निमादाय प्रविशति ।)

रामः – अमाव्याजसखित्वस्य साक्षी भवतु पावकः ।

सुग्री – स्थिरस्य मित्रभावस्य साक्षी वैश्वानरोऽस्तु मे ।।

रामः – मित्र सुग्रीव ! उपस्थिता सन्ध्या । अनुमन्यस्व नौ संध्याकालानुष्ठानाय ।

सुग्री – बाढम् । (यवनिका पतति ।)

द्वितीयं दृश्यम्

(ततः प्रविशतः रामलक्ष्मणौ ।)

रामः – अयि लक्ष्मण ! ननु पश्यसि नीतेर्गहनां गतिम् ?

लक्ष्मणः–कथमिव ?

रामः – आ बाल्यात् शिक्षामहे ग्रन्थेभ्यो बह्वीर्नीतीः । तथापि लोके तासामनुष्ठानं पठनसुलभं न भवति । यदि

द्वयोर्नीत्योः परस्परसंघर्षो भवेत् कस्यचिज्जीवने का अनुसरणीया का च त्याज्येति तस्य महती समस्या उद्भूयेत ।

लक्ष्मणः–द्वयोर्या गरीयसी सा अनुवर्तनीया उपेक्षणीया अन्या चेति खलु नीतिविदो वदन्ति । यदि कश्चित् प्राणभीत्या विद्रवति गृहीतशस्त्राः केचित् तमनुगम्य कुतः स पलायित इति कमपि पृच्छन्ति असत्यवचनादेव पलायितस्य प्राणरक्षणं भवेदतः असत्यैवोक्तिः साधीयसी स्यात् तदा ।

रामः – वाढम् ! वालिना गुणवान् भ्राता निर्वासितस्तस्य भार्या च हृता । अतः खलु कवन्धेनावां राज्यहीनेन सुग्रीवेण सख्यं कर्तुमुपदिष्टौ न तु राज्ञापि वालिना । कथं वा त्वं मन्यसे ?

लक्ष्मणः–साधीयान् ते तर्कः ।

राम – सम्प्रति वाली हन्तव्यः सुग्रीवः अभिषेचनीय आवाभ्याम् । अपि च वालिना ससैन्येन सम्प्रति युद्धमस्माकं न कार्यम् । यदि वाली कथमपि हन्यते सर्वे वानराः सुग्रीवं राजानं स्वीकरिष्यन्ति विधेयाश्च तस्य भविष्यन्ति । राजपरिवर्तनमधुना कर्तव्यम् ।

लक्ष्मणः–सम्यगाह भवान् ।

रामः – राजनीतिमाश्रित्य छलेन वालिनं व्यापादयामि ।
निपततु नाम मयि अपकीर्तिः ।

अनाविलेन मनसा नरः सर्वं समाचरेत् ।
कीर्तिर्यद्वापकीर्तिस्स्यात् कीर्त्यात्मा नानुगम्यते ॥
वृत्रं हत्वा महेन्द्रेण बलिं संयम्य विष्णुना ।
अपि स्वीकृत्य दुष्कीर्तिं लोकश्रेयः कृतं महत् ॥

सम्प्रति सुग्रीवसमीपमेव गच्छावः कार्यालोचनाय ।
(इति निष्क्रान्तौ । यवनिका पतति ।)

तृतीयं दृश्यम्

(ततः प्रविशति सुग्रीवः ।)

सुग्री – (स्व) रामेण विहिता संविद् बाणशक्तिः परीक्षिता ।
सुचिन्तित उपायश्च सिद्धिर्भवतु मेऽधुना ॥

समासादितं राजभवनद्वारम् । आह्वये वालिनं युद्धाय मरणाय च । (उच्चैः) भो वालिन् ! आगम्यतां बहिर्मया सह बाहुयुद्धं क्रियताम् ।

(रङ्गमध्ये यवनिका अपसार्यते । आसनस्थौ तारा-वालिनौ प्रविशतः । तारा चषकयोः सुरां पूरयति । पातुं चषकावुद्धरतः ।)

सुग्री – भो वालिन् ! आगम्यतां बहिर्मया सह बाहुयुद्धं क्रियताम् । (इति निष्क्रान्तः)

वाली – (श्रुत्वा चषकं फलके न्यस्य उत्थाय) अहो कः स मरणोत्सुको युद्धाय मामाकारयति ? पश्यामि तावद् गवाक्षात् । (परिक्रम्य दृष्ट्वा) हा हा ! सुग्रीवोऽसौ । न विश्वसिमि मम दृष्टिं श्रुतिं च । हन्त जले प्लवति शिला मज्जति दारु । उरभ्रः पर्वतं भेत्तुमभिपतति । तारे ननु श्रृणोषि सुग्रीवो मां युद्धायाह्वयते । मुहूर्तं मां प्रतिपालय यावत् सुग्रीवं हत्वा आगमिष्यामि सह च पास्यावः । सज्जीक्रियतां महती सुरा । अद्य शत्रुवधमोदः अनुभवनीयः भ्रातृमरणदुःखमपनेतव्यं च ।

तारा – (उत्थाय तं हस्तयोर्गृहीत्वा) नाथ ! मा सहसा किमपि कुरु । उपविश । श्रृणु मम वचनम् ।

वाली – नास्ति श्रोतव्यं वक्तव्यं च किमपि । अथवा उच्यतां किमप्यन्यत् सुग्रीवं मा जहीति विहाय ।

तारा – बहुवारान् पूर्वं त्वया पराजितः सुग्रीवः सम्प्रति कां प्रेरणामास्थाय युद्धाय त्वामाकारयतीति किञ्चित् सम्प्रधारय ।

वाली – मरणाय मतिप्रेरणामास्थाय ।

तारा – आर्यपुत्र ! विवेकी ते भ्राता विनाशिनीं मतिं कदापि न करोति ।

वाली – (स्व) अये तारायाः सुग्रीवे पक्षपातः ! दुर्मतिं भीरुं सुग्रीवं निपुणो विवेकी शूर इति सर्वदैषा वक्ति । परिगृहीतैषा तेन जाल्मेन मयि मायाविना बिले युद्धलग्ने राज्यमाक्रमता । बहुप्रणयं कृतापि मया बहुभोगैः सन्तर्पितापि न तं विस्मरति । हन्त कियती ननु स्त्रीणां मनसो दुरवगाहता दुर्भेद्यता च ! हा धिक् । आ विन्ध्याचलविजयिना वालिना स्वभार्याया मनो न जितम् । (प्र) तारे ! अवशेषशौर्यवान् सुग्रीवो मां प्रणुदति युद्धाय । तस्य शौर्यविशेषं विवेकं च विनाश्यागमिष्यामि । मा मां विलम्बय ।

तारा – अङ्गदो वदति ऐक्ष्वाकवौ दाशरथी रामलक्ष्मणौ ऋष्यमूकमागतौ सुग्रीवस्ताभ्यां सह सञ्चरतीति । प्रबलस्ते शत्रुवर्गः । युद्धाद्विरम । न ते भ्राता सुग्रीवो दण्डनीयः । लालनीयः सः । प्रसीद तस्मिन् । अलं विरोधेन बलवता भ्रात्रा ।

वाली – (कोपेन) तारे ! (इत्युच्चैराकृश्य तस्या मुखं दृष्ट्वा स्व) अङ्ग । अस्याः कुवचनैरुत्थितः कोपो मुखसुषमादर्शनात् शाम्यति । (प्र)(सप्रणयम्) तारे ! ममाप्येतज्ज्ञातम् । रामो वा लक्ष्मणो वा मां किं करिष्यति ? पश्यतां रामलक्ष्मणौ मम पराक्रमम् ।

न मर्षये शत्रोरवलेपम् । आः शत्रुर्मे हन्तव्यः स सुग्रीवो न लालनीयः सोदरः । ध्रियमाणस्यापि भ्रातुर्येन जलाञ्जलिर्दत्तः सिंहासनं चाक्रान्तं कथं नाम स लालनीयो भवति ? भवतु । तव वचनात्तं न हन्मि । असकृत् स हन्यमानोऽपि न मया प्राणैर्वियोजितः । अद्यापि न हनिष्यामि किन्तु तस्य ग्रीवास्तम्भमपनेष्यामि । त्वमभ्यन्तरे तिष्ठ ।

तारा – नाथ ! दैवतानि त्वां रक्षन्तु । स्थीयतां तावत् मया कृतस्वस्त्ययनो यास्यसि । (अन्तर्गत्वा स्वस्त्ययनभाजनं गृहीत्वा आगत्य तस्य स्वस्त्ययनं कृत्वा तिलकं निवेश्य) नाथ ! विजयस्व ।

वाली – इदानीमसि मम भार्या तारा । (स्व) निराधारा मम शङ्का । प्रीणाति मयि तारा । (प्र. उच्चैः) भोः सुग्रीव ! तिष्ठ तिष्ठ । अयमयमागतोऽस्मि ।

(इति निष्क्रान्तः । यवनिका पतति ।)

चतुर्थं दृश्यम्

(ततः प्रविशति वाली सुग्रीवः हनुमान् जाम्बवान् मैन्दः द्विविदः केचन वालिपक्षिणो वानराश्च ।)

जाम्ब – भो वालिसुग्रीवौ ! अपि सन्नद्धौ युवां नियुद्धाय ?

वाली - सन्नद्धोऽस्मि ।

सुग्री - सन्नद्धोऽस्मि ।

जाम्ब - तत् प्रवर्ततां युद्धम् ।

वालिसुग्रीवौ - बाढम् ।

(इति निष्क्रान्तौ । ताभ्यां सह मैन्दद्विविदौ वालिपक्षिणश्च निष्क्रान्ताः । रामलक्ष्मणौ प्रविशतः ।)

हनु - भो राम भो लक्ष्मण ! दृश्यतां सुदारुणं बाहुयुद्धं वालिसुग्रीवयोः ।

उभौ नियुद्धे निपुणौ शूरौ च बलिनावुभौ ।
सुन्दोपसुन्दाविव तौ परस्परवधोत्सुकौ ॥

लक्ष्मणः- अये भ्रात्रोरारूढशत्रुता !

अन्योन्यं प्रीणनीयौ मुहुरभिपततोऽन्योन्यघातप्रयत्नौ
प्रेम्णा बाल्ये मिथो येऽवटुघटितकरास्ते गलौ पीडयन्ति ।
भुक्तौ पीतौ शयानौ सह सह विहृतौ साकमेवैधितौ यौ
तावुत्पातान् निपातान् सह कुरुत इदानीं मिथो हन्तुकामौ ॥

रामः - अहो तुल्यविक्रमौ सोदरौ । हनुमन् ! किञ्चिदिव भ्रान्तोऽस्मि । अनयोः यः प्राङ्मुखः स सुग्रीवः किल ?

हनु – अथ किम् । यः प्राङ्मुखः स सुग्रीवः । अन्यो वाली ।

रामः – सम्यगभिलक्षितौ । अयं सुग्रीवः अयं वाली । परस्परं कर्षतः । भ्रमणं कुरुतः । वत पुनरपि व्याकुलोऽस्मि अनयोरभिलक्षणे । उभौ समानाकारप्रमाणौ समानविक्रमौ च परस्परं सदृशौ स्तः । हनुमन् ! किञ्चन अभिज्ञानं क्रियतां सुग्रीवस्य ।

हनु – बाढम् । पुष्पशाखामिमां सुग्रीवस्य कण्ठे विन्यस्यामि ।

(इति पुष्पशाखां छित्वा गृहीत्वा निष्क्रान्तः ।)

रामः – सम्यगभिज्ञायते सुग्रीवः पुष्पशाखया । यावन्न सा त्रुटयते तावद् वालिनं व्यापादयामि । (इति वाणं प्रयुङ्क्ते । पार्श्वतः हा हतोऽस्मि इति वालिनः आर्तस्वरः श्रूयते ।) पतितो वाली ! तत्रैव गच्छामः ।

(सर्वे निष्क्रान्ताः । रङ्गमध्ये यवनिका अपस्रियते । ततः प्रविशन्ति वाणविद्धः पतितो वाली, अधोमुखः सुग्रीवः, हनुमान्, जाम्बवान्, मैन्दद्विविदौ, रामलक्ष्मणौ च ।)

वाली – भो राम ! कस्त्वम् ? का ते वार्ता ? कः पुनस्तवाचारः ?

वहसि विपुलं चापं स्कन्धे करोषि न शूरवत्
त्वचमपि जटा धत्से किञ्चिद् व्रतं न समाचरेः ।
ललितवदनः श्लक्ष्णाकारो हृदा बहुनिष्ठुरः
नृपकुलजनिर्दस्योर्वृत्तिः श्रुतावपि मूर्खता ॥

रामः – प्रकाममुपालब्धोऽस्मि ।

वाली – अन्येन युद्धलग्ने मयि कथं शस्त्रप्रहारः कृतः ?

रामः – भो राजन् ! कुशलोऽसि राजनीत्याम् । ननु निकृत्यापि शत्रुर्वध्यः ।

वाली – न स्मराम्यावयोः शत्रुत्वम् ।

रामः – मित्रस्य शत्रुरिति शत्रुर्मे भवान् ।

वाली – हुं ! ननु सुग्रीवस्ते मित्रम् ? अथवा अनुरूपस्त्वं वयस्यः सम्प्राप्तः सुग्रीवस्य येन जीवन्नपि स्वभ्रता निवापाञ्जलिं प्रतिग्राहितः। तवाभिजातत्वेन वल्कलधारणेन सौम्यदर्शनेन च न सम्यक् परिगणितस्त्वं दुर्णयकञ्चुकधरः अधर्मदेहः ।

रामः – राजन् ! सर्वः क्लेशसमये धर्मं चिन्तयति न तु प्रभावकाले । केन धर्मेण त्वया भ्राता निरस्तः तस्य पत्नी चापहृता ?

वाली – सम एष दोषो मम सुग्रीवस्य च ।

रामः – अजानता तेन कृतस्त्वया तु जानता ।

वाली – भो नयधर्मभाषिन् । (बाणबाधं नाटयित्वा) अलं विवादेन । त्वं जितकाशी अहं विजितो हतश्च । इदानीं त्वं यथेच्छं किमपि भाषितुं प्रभवसि । सर्वे च तव श्रोतारः सम्पद्यन्ते । किमहं वदामि ? भवतु । लोको निर्णयतु आवयोः धर्माधर्मौ । हनुमन् ! अङ्गदमानय ।

हनु – आगच्छत्यङ्गदः ।

वाली – सुग्रीव ! दैवनिर्णयोऽयं यदावयोरेककाले नास्ति राज्यभोगानुभवः । अधुना राजासि त्वम् । कातरोऽस्म्यङ्गदविषये । बालः सः । तं युवराजं कुरु । बले शौर्ये विवेके च स ते न हीयते । ताराया वचनमश्रुत्वा हतोऽस्मि । विवेकिनी सा । ताराया मतं कदाप्यन्यथा न भवति । सर्वदा तस्या मतमनुसर । मा तामवमन्यस्व ।

सुग्रीव – गृहीता गुरोराज्ञा । (स्व) उत्सीदन्ति ममेन्द्रियाणि । कोपाविष्टेन अदीर्घदर्शिना कृतो मया भ्रातृवधः । कथं नाम आ जीवितान्तमस्मात्किल्बिषात् शोकाच्चात्मानं मोचयिष्यामि ?

हनु – अयमागतः अङ्गदः ।

(सानुचरः अङ्गदः प्रविशति ।)

अङ्ग – हा तात (इति वालिनः पादयोः पतति रोदिति च ।)

वाली – पुत्रक ! मा रुदिहि । त्वादृशो न रोदितुमर्हति । वलीयसा विधिना एवं वञ्चितोऽस्मि । हनुमन् ! सान्त्वय पुत्रकम् ।

हनु – अङ्गद ! स्थिरीक्रियतां मनः ।

वाली – अङ्गद ! नेतः परमर्भको भवसि । सुग्रीववशवर्ती भव । अहमिव त्वां सुग्रीवो न लालयति दोषं च ते न क्षमेत । जागरूको भव सर्वदा कर्तव्यनिर्वहणे । सुग्रीव ! गृहाण पुत्रकस्य हस्तम् । प्रशाम्यतु मयि ते कोपो मय्येव । हा ! (इति वाणबाधं नाटयित्वा) दुस्सहो वाणबाधः । सुग्रीव! श्रूयताम् ।....अङ्गद ! (इति तस्य हस्तं गृहीत्वा मृतः ।)

अङ्गदः–हा तात ! (इति पुनः पादयोः पतति । ततः प्रविशति परिचारिकानुबद्धा तारा ।)

तारा – हा नाथ ! (इति रुदती पादयोः पतति) हा आर्यपुत्र! कुत्र गतोऽसि ? देहि मे प्रतिवचनम् । जात अङ्गद !

वञ्चितौ आवां रामरूपधारिणा विधिहतकेन। हा आर्यपुत्र! महार्हशयनोचितस्त्वमुपलाकीर्णायां भूमौ कथं शेषे?

(इति वालिनं परिष्वजते)

हनु – (अपवार्य) नील! निष्कृष्यतां शरो वालिनो देहात्।
(नीलस्तथा करोति।)

तारा (तं शरं गृहीत्वा उत्थाय) भो राम! अनेनैव शरेण मामपि जहि। प्रापय मां मम भर्तुः सकाशम।

व्याधोऽपि जन्तुमिथुनाद् हत्वैकं निर्घृणो भवेत्।
ततो मामपि हत्वा त्वं भव राम दयायुतः॥

जीवितात् विरक्तास्मि। जहि मां शीघ्रम्।

रामः (स्व) कथमिव प्रतिवक्तव्या मया? न खलु पर्याप्ता वाग् विकीर्णमूर्धजां वाष्पदिग्धमुखीं हतभर्तृकामेनां समाहितां कर्तुम्। (अपवार्य) हनुमन्! सान्त्वयात्र-भवतीम्।

हनु – देवि तारे! अलं रुदितेन। अङ्गदं पश्य पुत्रकं तव प्रेमभाजनम्।

तारा – नास्ति मे जीविते इच्छा। अङ्गादसदृशानां पुत्राणां शतमपि न मम भर्तृसमं भवति प्रेमणि न चापनयति

मे भर्तृशोकम्। अशक्यं मे प्राणधारणं प्राणाधिकं भर्तारं विहाय।

हनु – समाश्वसितु समाश्वसितु अत्रभवती।

रामः – जाम्बवन्! परिणमति कालः। न नाम शोकस्य पार इति। सज्जीक्रियतां राज्ञो वालिनो देहसंस्काराय।

जाम्ब – यदाह भवान्। (इति निष्क्रान्तः। रामलक्ष्मणौ वहिः स्थितौ। रङ्गमध्ये यवनिका शनैः पतति।)

रामः – लक्ष्मण!

नीतिं च धर्मं च सुकार्यपद्धतिं
विचिन्त्य सर्वं बहुधा विनिश्चितम्।
विचार्य सम्यक् कृत एष उद्यमः
तथापि चेतः परिखिद्यतेऽधुना॥

चोरमपि दण्डयित्वा शुच्यते कथं पुनः सदृशं राजानं छलेन हत्वा न दूयते मनः।

उत्सन्नो वालिशिखरी स्तब्धो वालिप्रभञ्जनः।
शुष्को वालिमहावार्धिः पतितो वालिभास्करः॥

(इति निष्क्रान्तौ)

(यवनिका पतति)

— —

ततीयः अङ्कः

प्रथमं दृश्यम्

(ततः प्रविशतो विजयविलासी ।)

विलासः–मित्र विजय ! कुत आगम्यते ? किष्किन्धाया ननु ?

विजयः –अथ किम् ?

विला– का वार्ता किष्किन्धायाम् ? वालिमरणानन्तरमहं लङ्कां गतः । उत्सुकोऽस्मि । कथ्यतां यद्वृत्तमेषु दिनेषु ।

विज – वालिनो मृतेरनन्तरं सुग्रीवः अभिषिक्तः । तदा वर्षाकालः सन्निहित आसीत् । ततो रामो वर्षाकालं यावत् विश्राम्य अनन्तरं शरदि प्राप्तायां सीतान्वेषणाय वानरसेना प्रेष्यतामिति सुग्रीवमवोचत् । सुग्रीवो राज्ये अभिषिक्तो रुमां तारां च प्राप्य भोगेषु निमग्नो दिनानि यापयति । तत्र लङ्कायां को वृत्तान्तः ?

विला – शोचनीयो वृत्तान्तः । प्रतिदिनं रावणः सीतायै मधुराणि खाद्यानि अनर्घाणि भूषणानि मनोहराणि वस्त्राणि च प्रेषयति, सीता सर्वाणि तानि प्रत्याख्याति । राक्षस्यो रावणस्य पराक्रमं वैभवं च तस्यै कथयन्ति, तं स्वीकुरु इति उद्बोधयन्ति, सीता तासां वचनानि न शृणोति सर्वदा राममेव चिन्तयति ।

रावण: पञ्चषदिनेषु एकदा अशोकवनं गत्वा सीतामेवं वदति स्म। 'अयि वामे! मया स्वभर्तृभ्यः अपहृताः बह्व्यः स्त्रियः सन्ति सर्वास्ता मां भजन्ते सुखेन च वर्तन्ते। कोऽयं तवाभिनिवेशः अयोग्ये भर्तरि ? अहं तर्कयामि यत्ते पतिः चिरात् त्वां विस्मृत्य स्वदेशं गतः कयाप्यन्यया परिणीतया सुखमास्ते अथवा निष्कामः प्रव्रजितस्तपश्चरति क्वापि गुहायाम्। किमर्थं तस्य कृते विलपसि भोगार्हाणि दिनानि उपवासैः कष्टमयानि परिवर्तयसि ? मां भज। मम प्रियतमा भार्या भव प्रवर्ततामावयोर्विवाहः शास्त्रविहितेन मार्गेण। सागरपरिक्षिप्तेयं लङ्का कस्यापि दुरासदा। भीतिं सन्देहं च विहाय मया सह भोगान् भुङ्क्ष्व' इति। इत्थं प्रार्थ्यमाना सीता तं न पश्यत्यपि। तृणमन्तरतः कृत्वा 'भो राक्षसेश्वर! स्वदारेषु ते प्रीतिः कार्या। नाहं रामादन्यं भजे' इति प्रतिवचनं ददाति। प्रतिहतमना रावणो गच्छति परन्तु सीतायां कामं न त्यजति। पुनः पुनरेवं रावणस्य दुर्वचनमयीभिः प्रार्थनाभिः सीता भृशं दूयते। तत्र कीदृशी रामस्यावस्था ?

विज – दयनीयास्ति। किष्किन्धायाः समीपस्थं माल्यवन्तं पर्वतमधिवसति सलक्ष्मणो रामः। प्रवर्तमाने वर्षर्तौ विरहाकुलितो भवति। (इति निष्क्रान्तौ)

(यवनिका पतति)

द्वितीयं दृश्यम्

(ततो रामलक्ष्मणौ प्रविशतः।)

रामः – अयि लक्ष्मण ! पश्य मेघाडम्बरम् । समन्तादाकाशो मेघैरावृतः । यथा शीतलो वाति वायुस्तथा तर्कयामि वृष्टिरचिरेण भवति । इदानीं कतिचिद् वर्षविन्दवः शनैः शनैः पतन्ति । दूरे ऋष्यमूको मेघैः पूर्णतया आच्छन्नः। महती वृष्टिर्वेगेन तत इतः प्रसरति । हन्त! आगतो महान् वर्षः। पवनेन दोधूयमानो महान् वर्षासारः प्रवर्तते । पर्वतात् स्रोतोभिर्महता वेगेनाधः पतति भूरि जलम् । ग्रीष्मतप्ता पृथिवी एकपदे जलमग्ना एकजलराशीकृतेव दृश्यते । पवनधूता वृक्षा घूर्णन्ते अतीव मत्ता इव । शाखास्वन्योन्यं सक्ताः खेलन्तो बाला इव लक्ष्यन्ते । वर्षवेगः सम्प्रति किञ्चिदिव मन्दीभूतः परन्तु प्रसज्य पतति वृष्टिः। किष्किन्धां पश्य दूरे यत्र तालशाखाच्छादितानि गृहाणि छत्राणीवेतो दृश्यन्ते । हन्त पुनरपि वर्षवेगो वर्धते । प्रकृतिं समस्तां प्रतिसीरया आवृतामिव कुर्वन्ति वर्षविन्दुश्रेणयः । अहो मेघानां स्निग्धगम्भीरो निर्घोषः श्रवणसुभगं श्रूयते । अहो गगने तटितामसहनीयं प्रचण्डं तेजो दृष्टिं प्रहरति । अयमशनिनिपातो येन सर्वं जगद् विदीर्यत इव । बत कथमिदानीं वर्तते सीता कुत्र वा । मां चिन्तयन्ती

कथं वा विलपति सीता। मन्येऽयं वृष्टिपातो मम सीतायाश्च परस्परविलापाश्रुपात एव। आ मध्याह्नं प्रसक्ता अधुना वृष्टिः शान्ता। गगनमनावृतं भानुश्च पुनः प्रकाशते। पश्य पूर्वस्यां दिशि वितनमिन्द्रधनुः शोभते। विभासमानां पूर्वां दिशं पश्यन् सीताया हासमयं मुखं स्मरामि। तस्या गण्डयोर्मया धातुभी रचितस्तिलक इव चकास्ति इन्द्रचापः। अपि पुनर्द्रक्ष्यामि तस्याः शोभमानं वदनम्? अपि लक्ष्मण अस्य वर्षर्तोरनन्तरं सीताया वार्तां ज्ञास्यामि?

लक्ष्मण–मा विषीद मा विषीद राम। धीरो भव। अचिरेणैव ज्ञास्यसि प्राप्स्यसि च तत्रभवतीं सीताम्। शरदि प्राप्तायां सुहृद्वरः सुग्रीवः सेनां प्रेरयिष्यति तत्रभवत्या अन्वेषणे।

(यवनिका पतति)

तृतीयं दृश्यम्

(ततो रामलक्ष्मणौ प्रविशतः।)

रामः – अयि लक्ष्मण पश्य शरद्रात्रेः शोभाम्। मेघनिर्मुक्तं गगनं प्रसन्नाश्च दिशः। शरज्ज्योत्स्नया सर्वं जगदाप्लावितमिव दृश्यते। अहो! सौन्दर्यपरीवाह उडुपते रोदसी आपूरयति। देव्याः शरद्विभावर्यां

ग्रैवेयकमणय इव विराजन्ते ताराः। नूनमस्यां वेलायां सीतापि चन्द्रबिम्बं पश्यन्ती मां चिन्तयन्ती नितान्तं खेदमनुभवति। भोः शशिन्! अपि पश्यसि मम प्रियाम्? कुत्रास्ति सा? अपि कुशलिनी? किं मे प्रतिवचनं न ददासि? भार्याभिस्ताराभिः परिवृतस्त्वमस्यां रजन्यां सुखमश्नुषे न च मां गणयसि। लक्ष्मण! गतो वार्षिक ऋतुः शरच्चागता। सुग्रीवमागतं न पश्यामि। अपि सुग्रीवः सीतान्वेषणाया व्यवस्थां करिष्यति? किं वा तर्कयसि?

लक्ष्मण – करिष्यतीत्यासीन्ममापि विश्वासः किन्तु संशीतिरिदानीं जायते।

रामः – (दूरतो दृष्ट्वा) पश्य किष्किन्धायां दीपश्रेणयो वीथीषु प्रचलन्ति। वाद्यानि नाद्यान्ते। उत्सवो नु?

लक्ष्मण–अथ किम्।

रामः – मन्ये पौराः शरदुत्सवाननुतिष्ठन्ति। वत सुग्रीवो मां विस्मरति। प्राप्तराज्यो भार्यासहितो भोगनिमग्नो न मां परिगणयति सुग्रीवः। न कदापि मया चिन्तितं सुग्रीव इत्थं कृतघ्नो भविष्यतीति।

लक्ष्मण–नूनं व्यसनी कृतघ्नः संवृत्तः सुग्रीव इति तर्कयामि।

रामः – लक्ष्मण ! श्वः किष्किन्धां गच्छ सुग्रीवस्य चिकीर्षितमवधारय। मा भूः कृतघ्नो मा वालिपथमनुसरेति स अनुशासनीयस्त्वया ।

लक्ष्मण–तथा करिष्यामि। कृतघ्नो नाम अनुपेक्षणीयो दण्डयश्च । वधमर्हति सुग्रीवः । अभिषिक्तः अङ्गदः सीतान्वेषणाय प्रयतताम् ।

रामः – मा तावत् । लक्ष्मण ! त्वद्विधो नैवं वक्तुमर्हति। तत्र गत्वा नातिकठिनाभिर्वाग्भिस्तस्योपालम्भनं कर्तव्यम् । मा रभसात् तस्यावमानं कुरु दारुणैर्वचनैः। कोपस्य अर्धं संयन्तव्यमर्धं प्रदर्शनीयम् । सदोषोऽपि सुहृन्न त्याज्यः। अकार्या तस्य निकृतिः। गच्छ कार्यं च साधय ।

लक्ष्मण–तथा ।

(यवनिका पतति)

चतुर्थं दृश्यम्

(ततः प्रविशति हनुमान् जाम्बवांश्च ।)

हनु – मित्र जाम्बवन् ! कदा आगतोऽसि ?

जाम्ब–कार्यवशात् ग्रामान्तरं गतोऽस्मि अद्य प्रत्यागतमात्रः त्वां द्रष्टुं तव गृहं गतः। राजभवनं गतं त्वां निशम्य इहागतोऽस्मि। का व्यवस्था कृतात्र ?

हनु – न कापि।

जाम्ब – कथम् ? अकृता किं सीतान्वेषणाया व्यवस्था अद्य-पर्यन्तम् ?

हनु – श्रूयताम्। अभिषिक्तो महाराजः सुग्रीवो राज्यनिर्वहण-मस्मासु मन्त्रिषु किल विहाय अन्तःपुरं प्रविष्टस्तारया रुमया च सर्वदा सम्मिलितो न कदापि बहिर्निर्गच्छति न कस्यापि दर्शनं प्रयच्छति। इत्थं वर्षाकालो गतः शरच्च प्रविष्टा। शरद्यागतायामपि सीतान्वेषणायाः कामपि व्यवस्थां न करोति। वालिनः चतुर्थमासिक-तर्पणसमये अन्तःपुराद् वहिरागतस्य सुग्रीवस्य पुरः स विषयो मया कथमपि प्रस्तुतः। आत्रिध्यं स्थिता वानरनायकाः स्वसेनाभिस्सह पञ्चदशदिनेषु आ-गच्छन्तु इत्याज्ञां दत्वा पुनः प्रविष्टः अन्तःपुरम्। एवमादिष्टाः केचिदागताः केचिदायान्ति। रामः किं मन्यते किं वा विधास्यतीति व्याकुलोऽस्मि। वर्षाकाले असकृद् रामस्य समीपं गत्वा वार्तासंक-थाभिः कालक्षेपं कुर्वन् आसम्। सम्प्रति तत्र गन्तुमपि मम पादौ न प्रसरतः। कामासक्तेन सुग्रीवेण सैन्यसंग्रहोऽपि एतावता न सम्यक्कृत इति कया वाचा रामस्य ब्रूयाम् ?

जाम्ब – एवं प्रवर्तमाने राजानि किन्नु वयं कुर्मः ? अधुना किं निमित्तमत्रान्तःपुरे त्वया आगतम् ?

हनु – राजदर्शनार्थमेवागतोऽस्मि । तारया सह चतुरङ्गं क्रीडति भट्टारको न कर्तव्य उपरोध इति चेटचा अनुमतिं निराकृतो गच्छामि राजदर्शनमप्राप्य । मन-स्तापं ननु जनयति राज्ञः सुग्रीवस्य विषयनिमग्नता ।

मधुपानमदविलोलः
कामी सततं च तारया मिलितः
आस्ते वानरराजो
वानर इव तारया निगलितः ॥

जाम्ब – यद् भवितव्यं तद भविता । गच्छावस्तावत् ।
(इति निष्क्रान्तौ)

(रङ्गमध्ये यवनिका अपस्रियते । आसनस्थौ तारा-सुग्रीवौ चतुरङ्गक्रीडाव्यापृतौ प्रविशतः ।)

सुग्री – तारे! पश्य पश्य । कतिपयेषु चलनेषु तव क्रीडायाः संयमो भवति ।

तारा – ननु संयमो भवति ? (विचार्य) दृश्यताम् । एवं चालयामि ।

सुग्री – अहो ! निपुणं चालितवती । स्तोकान्मुक्ता । चषकं तावत् । (तारा चषकं प्रयच्छति सुग्रीवः पिबति ।) भवतु एवं चालयामि ।

तारा – (विचिन्त्य) एवं चालयामि ।

सुग्री – तारे समा भवति एषा क्रीडा । (चषकेण पिबति ।) एकदा त्वया जितम् । एकदा मया जितम् । एकदा समाभूत् । पुनः क्रीडावः ।

तारा – आर्यपुत्र ! निर्विण्णास्मि अनया चतुरङ्गक्रीडया । उद्यानवनं गत्वा सुखशीतलेन वायुना क्लमं विनोदयिष्यावः ।

सुग्री – न गन्तव्यमुद्यानवनम् । वृष्टिः पतेत् ।

तारा – (स्व)अये मत्त एषः ः द्यापि वर्षाकाल इति चिन्तयति । (प्र) आर्यपुत्र ! वृष्टिर्न भविष्यति । गता वर्षाः । एष शरत्काल आयातः ।

सुग्री – तर्हि रात्रौ गमिष्यावः । चन्द्रदर्शनं करिष्यावः । अथवा न गन्तव्यं तत्र । सन्निहितस्ते मुखचन्द्रः । तारे शृणु ।

वदनशशिनि ते शरद् विभाति
भवदरुणाधरयोर्वसन्तशोभा ।

तव घनकबरीभरे च वर्षाः
अथ शिशिरस्सुखशीतले करे ते ।।

सर्वर्तुमानोज्ञकसमाहारस्त्वं मम सन्निहितासि । अतः प्रिये मया बहिर्न गम्यते । स्थीयतामत्रैव । द्यूत-क्रीडां कुर्वः पणेन ।

तारा – कः पणः ?

सुग्री – शृणु ।

जयसि त्वं यदि दयिते
तत्तत्करवाणि यद्यदादिशसि ।
यदि जीयसे क्षणार्धं
हित्वा मां क्वापि नैव याहि ।।

अपि स्वीकृतः पणः ?

तारा – (सदरहासं) स्वीकृतः ।

सुग्री – तर्हि क्रीडामि तावत् । (अक्षान् क्षिप्त्वा) जितं मया ! इदानीं तव पर्यायः ।

तारा – तथा (अक्षान् क्षिपति) जितं मया !

सुग्री – देवि ! जयस्तवापि मम । अतो द्विर्मया जितम् ।

मया समोदं परिचर्यमाणा
प्रियेण तिष्ठेह दिवापि नक्तम् ।
रागातिरेके मिथुनस्य शिक्षां
रतिस्मराभ्यामनिशं ददाव ॥

(रङ्गमध्ये यवनिका पतति । ततः प्रविशति लक्ष्मणः।)

लक्ष्मण–राजभवनं प्रविशामि। मां दृष्ट्वा राजपुरुषा दौवारिकाश्च प्राञ्जलयो न निवारयन्ति। केचिद् भीता मार्गादपसरन्ति। केचन मूढा आयुधानि गृह्णन्तः कोऽसाविति पार्श्वस्थान् पृच्छन्ति तेषां प्रत्युत्तरेण शाम्यन्ति। इदानीमन्तःपुरं प्रविष्टोऽस्मि। इह सुग्रीवं कथं पश्यामि ? कोऽपि राजपुरुषः कञ्चुकी वात्र न दृश्यते येन संदिशेयम्। सर्वाः स्त्रियः सुवाससः सुभूषा इतस्ततो गच्छन्ति। मां दृष्ट्वैव सम्भ्रमादन्यतः अपसरन्ति। इमे आयातः।

(ततः प्रविशतो मालतीवासन्त्यौ।)

मालती–हञ्जे वासन्ति ! न मर्षणीयो मल्लिकाया गर्वः। देव्यास्तारायाः प्रधानपरिचारिकेति न तृणाय मन्यते मामपि देव्या रुमायाः प्रधानपरिचारिकाम्।

वासन्ती–मा तावदुच्चैः। कापि भित्त्यन्तरिता शृणुयात्। किमस्माभिः कर्तुं पार्यते ? तत्रभवत्यास्तारायाः परोक्षं

समस्तमन्तःपुरं मल्लिका किल शास्ति । (दृष्ट्वा) अये पुरुषः । गच्छ । अपसरावः ।

(इति निष्क्रान्ते)

लक्ष्मण—बत । गते ते । (दृष्ट्वा) असावपरा फलभाजनं गृहीत्वा आयाति । अप्यमूमाकारयामि ? भवति ! हा धिक् । मां पश्यन्त्या अमुष्याः करात् फलभाजनं गलितं फलानि चाधः कीर्णानि । विषमा खलु मम परिस्थितिरिह । न युक्तं कृतं मया यदन्तःपुरे सपदि प्रविष्टोऽस्मि अनन्यसहितः । कञ्चुकी तिष्ठतीति मत्वा आगतोऽस्मि तं न पश्यामि यतः कञ्चुकी न किल स्थाप्यते अन्तःपुरे वानरैः । किमिदानीं करोमि? भवतु निर्गच्छामि तावत् । हनुमता सह पुनरागमिष्यामि (पुरो दृष्ट्वा) अयमायात्येव हनुमान् ।

(ततः प्रविशति व्यग्रो हनुमान् ।)

हनु – उक्तोऽस्मि अङ्गदेन कुपितो लक्ष्मणो राजभवनं प्रविशन् दृष्ट इति । मा किमप्यत्याहितं सम्भवतु । एष कोपारुणनयनो दृश्यते लक्ष्मणः । उपसर्पामि एनम् । आर्य अभिवादये ।

लक्ष्मण– भो हनुमन् ! प्रेषितोऽस्मि रामेण मिथ्याप्रतिज्ञस्य राज्ञः सुग्रीवस्य सन्देशं कथयितुम् ।

हनु – (स्व) नूनं रामेण रुष्टेन भवितव्यं सुग्रीवस्यालसत्वे । का गतिः ? (प्र) आर्य ! द्रक्ष्यावः सुग्रीवम् । इत इत आगम्यताम् । (इति निष्क्रान्तौ)

(ततः प्रविशति संभ्रमेण चेटी ।)

चेटी – देवि देवि ! अत्याहितमत्याहितम् ।

तारा – (अपटीक्षेपेण प्रविश्य) हञ्जे मल्लिके! किमापतितम्?

चेटी - अमात्यो हनुमान् ब्रवीति रामस्य संदेशं गृहीत्वा क्रोधाविष्टो लक्ष्मणः अन्तःपुरमागतो महाराजं द्रष्टुमुपस्थितः । एवं भट्टारको विज्ञाप्यतामिति । क्षन्तुमर्हति देवी । अतिपातिनि कार्ये अमात्यवचनेन मया उपरोधः कृतः ।

तारा – अपि आर्यो लक्ष्मण आगतः ?

चेटी – अथ किमथ किम् ।

तारा – महाराजं विज्ञापयामि । त्वं तावत् प्रतिपालय ।

चेटी – तथा । (इति परिक्रम्य स्थिता ।)

(रङ्गमध्ये यवनिका अपस्रियते । ततः प्रविशति शयानः सुग्रीवः ।)

तारा – आर्यपुत्र ! उत्तिष्ठोत्तिष्ठ । किं शेषे ? न जानीषे आसन्नं भयम् ।

सुग्री - तारे किं ब्रवीषि ?

तारा - रामस्य संदेशं गृहीत्वा आगतो लक्ष्मणस्त्वां प्रतीक्षत इति हनुमता चेटी प्रेषिता । यत् सरोषो लक्ष्यते लक्ष्मणो कोऽपि दारुणः स संदेश इति अमात्यः तर्कयति ।

सुग्री - ननु लक्ष्यते सरोषो लक्ष्मणः ? नाहं बिभेमि लक्ष्मणाद् रामाद् वा । तथाप्यकारणकुपितं मित्रं संभ्रमं जनयति । कोऽपराधो मया कृत इति कुप्यति रामः ? अथवा केनापि पिशुनेन दुर्वचनेरावयोर्मित्रभेदः कृत इति तर्कयामि । मित्रस्य संपादनं नाम सुलभं प्रतिपालनं तु कष्टमेव यतः प्रीतिरल्पेनापि अनिष्टकरणेन अन्यथा-ग्रहणेन वा भिद्यते ।

तारा – आर्यपुत्र ! कामनिमग्नेन त्वया लोकोऽपि विस्मृतः । गतं वर्षाकालमागतां शरदं च न जानीषे ।

सुग्री – तारे ! अपि शरत् प्राप्ता ?

तारा – अथ किम् । तथापि रामं न पश्यसि । सीतान्वेषणायाः व्यवस्थां न करोषि । स्थाने कुपितो रामः ।

सुग्री – तारे ! कथं वा मां मन्यते रामः ? त्रपे तस्य पुरतो गन्तुम् । किं वच्मि लक्ष्मणस्य ?

तारा – अञ्जलिं बद्ध्वा तस्य क्षमां याचस्व। शीघ्रमेव सीता-न्वेषणाय उपक्रमस्व।

सुग्रीव – एवं करोमि। प्रथमं त्वं गत्वा लक्ष्मणं प्रसादय। निपुणासि वचनेषु। अनन्तरमहमागमिष्यामि।

तारा – बाढम्। (इति निष्क्रान्ता)

यवनिका पतति

पञ्चमं दृश्यम्

(ततः प्रविशति आसनस्थो लक्ष्मणो हनूमांश्च।)

हनु – (स्व) कालः अतिपतति सुग्रीवो नायाति। व्यग्रोऽस्मि। (प्र) अयि लक्ष्मण किञ्चिदिव प्रतिपाल्यताम्। लघु आगच्छति सुग्रीवः।

(ततः प्रविशति तारा। तां दृष्ट्वा तौ मनाग् विस्मितौ।)

तारा – स्वागतमार्याय। अभिवादये।

(लक्ष्मणहनुमन्तौ आसनाभ्यामुत्थितौ।)

लक्ष्म – अभिवादये अत्रभवतीम्।

(सर्वे उपविशन्ति)

तारा – अपि कुशली भवान् ? अपि कुशलं तत्रभवतो रामस्य?

लक्ष्म – कुशलिनावावाम् । (स्व) अये ममागमनं श्रुत्वा त्वरया नातिसज्जितवेषा सामिसंघटितवेणी अभ्यन्तरादिहागतेव देवी तारा! विस्मयावहः खलु लोकपरिणामः ।

चतुर्मासात् पूर्वं हतपतिसकाशेऽलुठदियं
महार्त्या जीवेच्छा नहि नहि ममास्तीति रुदती ।
अये पश्याम्येनामितरपतिसंयोगललिता–
मिदानीमेतावान् विषयगतसंगः खलु नृणाम् ।।

(प्र) भवति ! भ्रातुः सदेशं गृहीत्वा राजानं द्रष्टुमागतोऽस्मि ।

तारा – आगच्छति सुग्रीवः । कथ्यतां तावन्मे । किमाज्ञापयति तत्रभवान् रामः ?

लक्ष्मण – भवति श्रूयताम् । समयानुसारेण सुग्रीवो राज्ये स्थापितो रामेण। सुग्रीवस्तु समयं विस्मरति भञ्जयति वा । संप्रति शरत्कालः प्रचलति । अपि तु सुग्रीवो रामपत्नया अन्वेषणं न चिन्तयति । दुनोत्यावयोर्मनः सुग्रीवस्येयं कृतघ्नता । रामवाक्यमिदं श्रूयताम् । सुग्रीव ! न नाम क्षन्तव्या कृतघ्नता या सर्वशापान्यतिशेते । समये तिष्ठ इति ।

तारा – आर्य ! नेवं वक्तुमर्हसि सुग्रीवं न च राम एवं संदेष्टुमर्हति । न कृतघ्नोऽस्ति सुग्रीवो न च विस्मरति प्रतिश्रुतम् । तत्रभवत्याः सीताया अन्वेषणार्थमानयनार्थं च महती सेना संघटिता सुग्रीवेण । हनुमन्! कथ्यतामार्याय अस्माकं सेनासमाहारव्यवस्था ।

हनु – लक्ष्मण ! राज्ञः सुग्रीवस्यादेशेन सर्वे वानरनायकाः स्वसेनाभिः सह विविधदेशेभ्य आगता आयान्ति च । पञ्चषदिनेषु परिपूर्णा सेना सन्नद्धा भवति ।

तारा – इत्थं सेनाः प्रगुणीकृताः क्रियन्ते च । सुग्रीवश्च रामं द्रष्टुमिच्छति । यद्येतत्कार्ये किञ्चनालस्यं कृतं स्यात् सुग्रीवेण स भवतोः क्षान्तिमर्हति । बहुकालं कष्टमग्नेन सुग्रीवेण राज्यसुख प्राप्तम् । यदि स मानवप्रकृतेर्वशं गतस्तं क्षन्तुमर्हथः ।

लक्ष्म – (स्व) यदत्रभवती वदति तदुपपद्यते । श्रूयते किल विश्वामित्रो मुनिर्भूत्वापि मेनकया अप्सरसा संयुज्य वर्षदशकमहोरात्रममन्यतेति । (प्र) यद् भवती वदति तत् स्वीकृतम् । सुग्रीवं द्रष्टुमिच्छामि ।

तारा – (स्व) प्रसन्न इव लक्ष्यते लक्ष्मणः। एवं खलु सुजनानां कोपो जिह्वाग्रे वर्तते न तु मनसि। युक्तविनीतिवचनैस्तूर्णं शाम्यति। (प्र) बाढम्। (इति निष्क्रम्य यथोचितवेषेण सुग्रीवेण सह प्रविशति ।)

सुग्री – मित्र लक्ष्मण ! अभिवादये ।

लक्ष्म – अभिवादये ।

सुग्री – क्षम्यतां यदि मया दोषलेशः कृतः। श्रुतो भवता अस्माकं सैन्यसमाहारः। महती सेना सज्जिता। यदि भवाननुमन्यते राममद्य मिलित्वा कार्यसरणिं निश्चिनुमः ।

लक्ष्म – यदाह भवान् । मित्र सुग्रीव ! सत्यप्रतिज्ञेन त्वया मित्रेण नूनं नाथवानस्ति मे भ्राता। तत् शीघ्रमितश्चलितुमर्हसि भार्यावियोगदूनं रामं सान्त्वयितुम् । भ्रातृशोकोद्विग्नेन मया यदि किञ्चित्परुषमुक्तं तत् क्षन्तुमर्हसि ।

सुग्री – हनुमन् ! आज्ञापय प्रस्थानम् । मित्रं राममद्य सम्मेलिष्यामः।

हनु – तथा । (इति निष्क्रान्तः ।)

(यवनिका पतति ।)

चतुर्थः अङ्कः

प्रथम दृश्यम्

(ततो विजयविलासौ प्रविशतः ।)

विलास :– अयि मित्र को वृत्तान्तः ?

विजय :– सुग्रीवः चतसृषु दिक्षु सीतां विचेतुं सेनाः प्राहिणोत् । दक्षिणदिशा सा प्रायेण नीता स्यादिति प्रत्ययेन अङ्गदनायकत्वेन प्रबला सेना दक्षिणेन प्रहिता यस्यां हनुमान् जाम्बवान् मंन्दो द्विविदश्च सन्ति। सर्वेषां च मासावधिर्दत्तः। प्राक्पश्चिमोत्तरदिशासु ये गतास्ते प्रत्यागताः सीताया वार्तामलब्ध्वा । दक्षिणदिशायां गता अङ्गदनीता वानराः सर्वासु विन्ध्यपर्वतश्रेणीषु अन्विष्यान्विष्य सीतां नापश्यन् । तत्पर्वतेषु एकस्मिन् गहने मार्गहीनास्तत्र तत्रैव परिभ्रमन्तो विगतकालास्ते अत्यन्तं व्याकुला अभवन् । अनन्तरं पुनर्मार्गं प्राप्य एकस्मिन् प्रदेशे विगतं कालमनुचिन्तयन्तः अतिष्ठन् कर्तव्यमजानन्तः । दिष्टचा तत्र संपातिः समासादितः। नवमासेभ्यः पूर्वं काञ्चन सौन्दर्यवतीं स्त्रियमपहरन् रावणः संपातेः पुत्रेण दृष्टः । अतः संपातिना लङ्काया राज्ञा रावणेन सीता अपहृतेति दृढमुक्त्वा लङ्कां गन्तुमुपायोऽपि वानराणां सूचितः ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशति हनुमान् ।)

हनु – सागरं तीर्त्वा लङ्कां प्राप्तोऽस्मि । रात्रावागतोऽस्मि येन धीवरेणान्येन वा न दृष्टः । विश्रान्तिश्च लब्धा । अद्यैव नगरे न गन्तव्यम् । तत्र तत्राहिण्डमानो नगराद् बहिरागन्तुं मार्गानभिलक्षयामि पुनर्निवर्तितुं सागरः कुत्र सुतर इत्यपि निर्धारयामि । (परिक्रम्य) इमं शैलमारुह्य नगरं दूराद् द्रक्ष्यामि । (परिक्रम्य) आरूढः शैलः । इतः सुविस्तृतं नगरं सुगुप्तो दुर्गश्च दृश्यते । यद्यपि सीता दृष्टा भविष्यति तथापि किं नाम प्रयोजनं स्यात् ? वानरैः सह राम इहागन्तु न शक्ष्यति । यद्यागमिष्यति कथञ्चित् ? किन्तु कर्तुं शक्ष्यति ? (विचिन्त्य) मैवमहम् अङ्गानि मुञ्चानि । उत्साहप्राप्याणि नाम श्रेयांसि । सम्प्रति शैलादवरुह्य नगरमार्गान् द्रक्ष्यामि । (परिक्रम्य) परिशीलिता निर्धारिता च निर्गमनपद्धतिः । हन्त इदानीं रात्रिर्भवति । विश्राम्यामि कस्मिंश्चिद् विजने देशे (संविश्योत्तिष्ठति) हन्त सम्प्रति पूर्वाह्णः प्रवर्तते नगरे प्रविश्य सीतान्वेषणोपायं चिन्तयामि । मया अत्यन्तं जागरूकेण भवितव्यम् । यदि नाम कश्चिन्मां वैदेशिकमभिजानाति तर्हि गृहीतो हतो वा भवेयम् । भाषायामपि सावधानो भवामि । (परिक्रम्य) नगरे परिभ्रान्तोऽस्मि । संप्रति सायन्तनवेला भवति । (पुरोऽवलोक्य) जनसंदोहास्तत्र समवेता भवन्ति । गत्वा

पश्यामि । (परिक्रम्य) कश्चिदेक इत आयाति । त पृच्छामि । (ततः प्रविशति पुरुषः। हनुमान् तमुपसर्पति ।) भो भद्रमुख ! अत्र किं प्रचलति ?

पुरुषः – एतावन्न जानासि ? ननु ग्राम्योऽसि । भगवत्याः कात्यायन्या महोत्सव आसप्ताहमत्र प्रचलति । अद्य महाराज आगच्छतीति जना. समायान्ति ।

हनु – (स्व) हन्त द्रक्ष्यामि रावणम् !

(ततो वेत्रहस्तो राजभटः प्रविशति ।)

भटः - उत्सरत उत्सरत । महाराज आगच्छति ।

(इति निष्क्रान्तः)

पुरुषः – अयमयमागच्छति महाराजः रथ्य । रथादवतीर्य इत आगच्छति ।

हनु. – (स्व) अहो आकारोद्धतिः रावणस्य !

विविधरत्नविभूषणमण्डितो
बहुसुमप्रकराञ्चितविग्रहः ।
तदपि दुस्सहवंक्रतरूपधृत्
गिरिरिवाह्नि विनश्यति भात्ययम् ॥

Presented by
Sri K.V.R. Tirumalacharyulu
(Retd. Lecturer, Sri Narasimha
Sanskrit College, Chittigudur)
VIJAYAWADA

कास्विदसौ अमुष्य पार्श्वे सुभूषा सुवस्त्रा कामिनी चलति ? हन्त दृष्टा सीता । (क्षणं चिन्तयित्वा)

धिग् धिक्। मूढोऽस्मि न सा सीता भवेत् या सुवासाः सुभूषा रावणपार्श्वे अस्ति। (प्र) सौम्य ! का सा महाराजस्य पार्श्वे स्थिता ?

पुरुषः—मूढ ! ननु न जानासि राज्ञीं मन्दोदरीं या पुरा महाराजस्य प्रियतमा आसीत्।

हनु – ग्राम्योऽहं न जाने नगरवार्ताः। आसीदिति वचनेन जातकुतूहलोऽस्मि।

पुरुषः – (स्व) किमस्य कथयामि उत न कथयामि? भवतु। कथयामि। ग्राम्य एषः। (अपवार्यं) यस्मिन् दिने सीता नाम राजवधूः गोदावरीप्रान्तादानीता तस्मादारभ्य महाराजस्य सर्वासु भार्यासु कामाग्निर्निर्वाणः तस्यां समिन्धे। अनिच्छन्तीं तामशोकवने निवेश्य भूयो भूयो गतागतैरात्मानमायासयति तां बहुविधैर्विलोभयति प्रार्थयते च। न तु स्वीकृतस्तया।

हनु – (स्व) श्रुतं यज्ज्ञातव्यम्। अद्यैव रात्रावशोकवनं निभृतं गत्वा सीतां द्रक्ष्यामि। अशोकवनमार्गमन्यस्माद् ज्ञास्यामि।

(इति निष्क्रान्तः)

(यवनिका पतति)

द्वितीयं दृश्यम्

(ततः प्रविशति हनुमान् ।)

हनु– प्रविष्टोऽस्मि अशोकवने। दिष्टया न केनापि दृष्टोऽस्मि। (परिक्रम्य) बहुविस्तृतमिदं वनं विविधाश्च वृक्षाः। भगवांश्चन्द्रः प्रकाशमानो ममोपकुरुते यंन दूरादपि पश्यामि। हा प्रमादः ! वनपालिका आयान्ति। वृक्षस्य-पश्चान्निलीये। हन्त गतास्ताः। न पुरो गच्छामि सम्प्रति। किञ्चित्कालं प्रतीक्षे। (विचिन्त्य) पर्याप्तं प्रतीक्षितम्। पुरतो गत्वा पश्यामि। (परिक्रम्य) न कापीदानीं चलति। अनुरूपः काल. अन्वेषणाय। अन्विष्यामि तावत् (परिक्रम्य) इयं दीर्घिका। अप्यत्र प्रतीक्षे कदापि सीता आगमिष्यतीति ? न न। कालविलम्बो भवेत्। (दृष्ट्वा) समीपे चैत्यो दृश्यते। तत्र पश्यामि। (परिक्रम्य) महानयं चैत्यः स्तम्भैर्विराजते। स्त्रियश्चैत्ये सन्ति अन्तर्बहिश्च। सर्वाः शेरते। समीपे शिंशपावृक्षस्याधः काचिदुपविष्टास्ति द्वे स्त्रियौ तस्याः पार्श्वत उपविष्टे। (निरीक्ष्य विचिन्त्य) अप्यसौ सीता भवेत् ? अतिमनोहराकृतिर्मलिना कृशा विषादमुखी लक्ष्यते। मुहुर्मुहुर्निश्वसिति। अर्धरात्रेऽपि जागर्ति। अमुष्या आभरणस्थानानि प्रायेणाभरणैर्वियुक्तानि। मलिनं पीनकौशेयकं धरति। तथापि केवलेन सौन्दर्येण शोभते। लक्षणैरेतैरसौ सीतेति तर्कयामि।

अमुष्याः कर्णयोस्तादृशे भूषणे विराजेते यादृशे रामेणाभिहिते । ध्रुवमेषा सीता । अहो अस्याः रूपकान्तिः ! युज्जते यद् रामः अस्याः कृते तथा परिदेवयति । अहो परस्परानुरूपता सीतारामयोः ! पत्या सहेयं राजसौधवासमुत्सृज्य वनेषु आगता । नष्टायाः भार्यायाः कृते रामो विलपन् विलपन् उन्मादी भवति । अहमस्याः पश्चाद्देशे तिष्ठामि ।

(इति निष्क्रान्तः)

(रङ्गमध्ये यवनिका अपसियते ततः प्रविशति निषण्णा सीता विनता वृकोदरी च । पश्चान्मन्दं प्रविशति हनुमान् । पार्श्वत अन्यस्य शिशपावृक्षस्य पश्चान्निलीनः तिष्ठति ।)

हनु – (स्व) निलीनोऽस्मि पश्चात् शिशपावृक्षस्य । तासां संभाषणं श्रूयतां । प्रतीक्षे यावत् ते द्वे स्त्रियौ शयाते ततोऽमूमुपसर्पामि ।

वृकोदरी– सीते त्वं न निद्रासि ! अस्माकमपि निद्रां विनाशयसि । चैत्ये न तिष्ठसि । त्वया सह बहिरेव स्थातव्यं भूमौ च शयितव्यं भवत्यस्माकम् । संवत्सरः परिवर्तते । अद्यापि परिदेवयसि भर्तृहतकस्य कृते ।

सीता शान्तं पापं शान्तं पापम् ।

विनता– सीते त्वां प्रार्थयामहे। वराकं रामं विस्मर। महाराजं रावणं स्वीकुरु। जानासि रावणस्य प्रताप-मैश्वर्यं च दुर्मेधास्त्वमसि यदेवं स्वयमापतत् सौभाग्यं निवारयसि अनावश्यकं दुःखमनुभवसि। त्वमीषत् शिरःचालनेन अङ्गीकृतिमात्रं सूचय अनुक्षण-मान्दोलिका आगच्छति त्वां नेतुम्। अन्तःपुरं प्रविशसि जीवितं ते सुखमयं परिणमति।

सीता– विनते! पीडयसि मामा संवत्सरादीदृशैर्वचनैः। मैवं भण। हा धिक् हा धिक्! राम! कुत्रासि? त्रायस्व माम्। न जानासि मामिह बन्दीकृतां रक्षसीभिर्दुर्वचनैः पीड्यमानाम्।

हनु- (स्व) अये अत्यन्तं क्लिश्यत एषा। (दूरतो दृष्ट्वा) अहो दीपिका इत आयान्ति दूराद् वाद्यानि श्रूयन्ते। किं स्यात्? बत निकटमायान्ति जनाः। वृक्षमारुह्य अग्रे निलीये। (वृक्षारोहणं नाटयति) इदानीं वृक्षाग्रे शाखासु सुष्ठु निलीनोऽस्मि। न कोऽपि मां द्रक्ष्यति।

(ततः प्रविशति सपरिवारो रावणः। तं दृष्ट्वा सीता वस्त्रेण शरीरमाच्छाद्य संकुच्योपविशति।)

रावणः– (स्व) अवरोधपरिवृतोऽहं
हर्म्यगवाक्षाद् यदृच्छया दृष्ट्वा।
पूर्णेन्दुं सीतास्यं
दिदृक्षुरत्रागतस्तूर्णम्।

(सीतां दृष्ट्वा) हा धिक्! मां दृष्टैषा संवृताङ्गी वेपमाना तिष्ठति।(विहस्य, प्र)सीते! मां दृष्ट्वा वस्त्रेण स्तनोदरमाच्छाद्य आत्मानमदर्शनमिव कर्तुमीहसे। यदि मयि ते भयमस्ति तत् त्यज। यद्यपि त्वं मया हृता तथा'यकामां त्वां न स्प्रक्ष्यामि। प्रवर्तनां नाम मम शरीरे प्रकामं कामः। अयि अनवद्याङ्गि! मनोहरे ते शरीरे यस्मिन् यस्मिन् मम दृष्टिर्निपतति तस्मिन् तस्मिन् अङ्गे निरुद्ध्यते। मम प्रियतमा भार्या भव।

(किंचित् स्थित्वा)किमपि मे न प्रतिवदसि। एतावत्पर्यन्तं भर्तरि य आदरो दर्शितः कृतं तेन विरम अयोग्ये भर्तरि अभिनिवेशात्। कालो गच्छति न पुनर्निवर्तनाय एहि मया सह अन्तःपुरम्। आज्ञापय परिचारिकास्ते परिकर्म कर्तुम्। मया सह विहर क्रीड भोगान् भुङ्क्ष्व।

सीता– (तृणमन्तरतः कृत्वा) न ते युज्यते बहुवारान् मामेवं भाषितुम्। ममाभाग्येन ते दुर्वचांसि शृणोमि। (इति परावृत्य) निवर्त्यतां मत् तव मनः। स्वदारेषु प्रीतिः क्रियताम्। नाहं रामादन्यं कामये।

रावण – सीते! यथा यथा पुरुषः स्त्रियं सान्त्वयति तथा तथा स्त्री अभिमानवती भवति पुरुषश्च तस्या वशंवदो भवति। यावत् प्रियं तस्या वदति तावत् परिभूयते। सहजं चेदं स्त्रीणां लक्षणम्। त्वयीयं स्त्रीप्रवृत्तिर्या विशेषेणास्ति क्षान्ता सा एतावत्। त्यज्यतामुद्वेगकर

एषोऽभिमानस्तव । मयि प्रसीद । सर्वाभरणभूषितां रुचिरवाससं हासविभासिताननां त्वां द्रष्टुं नितरामुत्सुकोऽस्मि ।

सीता – यथा त्वं तव भार्या रक्षणीया मन्यसे तथैव सर्वे मन्यन्ते इति विचारय । पाल्यतां मानवधर्मः । नार्हस्येवं समाचरितुं मयि अन्यस्य भार्यायाम् ।

राव – स्त्रीहरणं नाम स्वधर्मोऽस्माकम् । विविधेभ्यो देशेभ्यो मया शौर्येणापहृत्यानीताः सन्ति बह्व्यः स्त्रियः । सर्वास्ता मयि अनुरज्यन्ते । एकैव त्वमयोग्यं वनचरं पतिं चिन्तयन्ती मां न स्वीकरोषि ।

सीता– अनिच्छन्त्याः स्त्रिया हरणं न कस्यापि धर्मो भवेत् । तवादेशको लङ्कायां न कोऽप्यस्ति अथवा न कस्यापि शृणोषि । अविवेकेन मुहुर्मुहुः प्रलपसि अयोग्यो राम इति । असन्निहिते मम भर्तरि मां हृत्वा न लज्जसे वक्तुमेवम् ।

राव– (विहस्य) दीनो वनचर इति अहतो विसृष्टः । भवतु हनिष्यामि रामम् ।

सीता– न भिद्यते ते जिह्वा एवं प्रलपतः । न ते शक्यं रामस्य पुरतो युद्धे स्थातुम् । मां हरन् यदि रामेण दृष्टः स्यास्तदैव हतो भवेः ।

रावणः– सीते! मर्षितमेतावत्तव दुरुक्तं प्रणयेन कोपं निगृह्य। मां कामय। त्यज रामे अनुपपन्नां प्रीतिम्। एकैकस्यापि दुर्वचनस्य त्वं वधमर्हसि। तथापि मासद्वयावधिर्दीयते। मम भार्या भव। अन्तःपुरं प्रविश। नो चेद् हनिष्यसे। मासद्वये यदि मां न कामयेथाः वधस्थानं नीयेथाः शिरश्छेदाय।

सीता– जहि जहि। सपदि मां जहि। नोत्सहे जीवितुम्।

रावणः– हुम्। भो वृकोदरि विनते त्रिजटे मुगले! मासद्वये सामभि-र्भीतिप्रदर्शनैश्च वचनैः सीतां मयि अनुरक्तां कुरुत। सीते! पुनरप्युच्यसे। मासद्वये मम भार्या भविष्यसि नो चेद् हनिष्यसे।

धान्यमालिनी– नाथ! अलमलं कोपेन। अकामां कामयमान-स्यायुः क्षयतीति भिषजो वदन्ति। मा ते आयुः क्षयतु। कामयमानां मां कामय। एहि गच्छावः।

(इति सर्वे ते निष्क्रान्ताः। सीता रोदिति। तस्माद् वृक्षादन्यवृक्षं गच्छति यं हनुमानधिवसति।)

वृकोदरी–रुदिहि रुदिहि। आप्रातःकालं रुदिहि। यदि विगतक्षमस्य अतिकुपितस्य रावणस्य मनः त्वद् विघ-टति यावज्जीवं विलप। आः (जृम्भिकां कृत्वा) अहं त्विदानीं चैत्ये स्वपिमि। विनते त्वमत्र तिष्ठ। (इति निष्क्रान्ता।)

विनता–सीते ! देवस्ते शोभां दत्तवान् न तु बुद्धिम् । वनदेवतेव दृश्यसे चक्षुष्प्रीतिं जनयसि परन्तु वनभूतमिव अस्माकं पीडां जनयसि । स्वपिहि त्वमिदानीमहं च स्वपिमि ।

(इति अध: स्वपिति ।)

हनु. – (स्व) स्वपित्येषा अन्याश्च चैत्ये स्वपन्ति । उपपन्न: समय: तया सह भाषितुम् । (क्षणं चिन्तयित्वा) अथवा नोपसर्पाम्येनां न च सम्भाषण करोमि । यदि काचिन्मां पश्यति आक्रोशति च सर्वे रक्षिण आगत्य मां गृह्णीयु: । महाननर्थो भवेत् । दृष्टा सीता ममागमनकार्यं च सफलमभूत् । तद् यावत् कश्चिन्मां न पश्यति तावदितोऽपसर्पामि । निवृत्य रामाय वार्तां निवेदयिष्यामि । (पुन: चिन्तयित्वा) नैवम् । प्रभूतं निर्भत्सिता रावणेन सीता । यदि नैराश्योद्घातेन मरिष्यति अत्याहितं भविष्यति । अतोऽनया सम्भाषे रामस्य वार्ताञ्च निवेदयामि येन सा धैर्यवती भविष्यति । अवरोहामि वृक्षात् । किन्तु यदि वृक्षादकस्मात् तस्या: समीपे पतेयं सा भयादाक्रोशेत् । अत: किं करोमि ? भवतु । वृक्षादेव नातिदूरे तस्या: प्रत्ययोत्पादकानि वचनानि वदामि । आगतोऽस्मि तस्या: समीपम् । (प्र) आर्ये रामपत्नि जनकपुत्रि दशरथस्नुषे सीते ।

सीता – (श्रुत्वा स्व) ननु कश्चिन्मां सम्बोधयति उत स्वप्नोऽयम् ? जागृतायाः कथं नु मे स्वप्नः ?

हनु – मा भैषीः ! अहं रामेण प्रहितो दूतः ।

सीता– (उपरि दृष्ट्वा स्व) कोऽयं धवलवस्त्रः सौम्यगम्भीरदर्शनः ?

हनु – रामप्रेषितोऽहं दूतः सम्प्राप्तः । मा भैषीः । वृक्षादवतरामि ।

(इति सीताया अभिमुखमागत्य नमस्करोति ।)

सीता– को भवान् ?

हनु– भवति ! रामेणाहं प्रहितो दूतो भवत्याः सकाशम् । राम वानरनायकेन सुग्रीवेण सह स्नेहं कृतवान् । वालि हत्वा सुग्रीवं वानरराज्ये स्थापितवान् । सुग्रीवे सुमहत् सैन्यं सज्जितम् । अहं तव वार्तां ज्ञातुं दू प्रेषितः सागरं क्रान्त्वा आगतः ।

सीता– अपि सत्यं वदति भवान् ?

हनु– भवति श्रद्धेहि मम वचनम् । रामस्य सन्देशं विज्ञापयामि यदि कश्चिन्मां पश्यति तदा अनर्थो भवेत् । अ प्रार्थये किञ्चिदिवापसृत्य वृक्षान्तरितौ भवावः ।

सीता– तथा ।

(सीता हनुमांश्च परिक्रम्यैकत्र तिष्ठतः ।)

हनु– भवति । विस्रब्धं श्रूयताम् । तत्रभवान् रामोऽत्रभवतीं सन्दिशति सुमहता वानरसैन्येन अचिरादागच्छामि रावणं हत्वा त्वां विमोचयामीति ।

सीता– अहो कियतः खलु कालस्य रामादानन्दकरीं वार्तां शृणोमि । सौम्य ! अमृतं सिञ्चसि मे श्रवणयोः । अपि कुशली रामः ? अपि कुशलं लक्ष्मणस्य ?

हनु– कुशली रामो लक्ष्मणश्च । त्वामेव सर्वदा चिन्तयन् भृशं शोकार्तो भवति रामः । मांसं स न खादति मधु न सेवते । पञ्चदिनेषु एकदा वन्यं फलमूलादिकमत्ति । शरीरे पततो मशकमक्षिकाक्रिमीनपि नापसारयति ।

सीता– अमृतविषयोर्मिश्रमिवाभाति भवतो रामवार्ताकथनम् । अपि सत्यं यद् भवान् भणति राम आगच्छति महतीं सेनामादाय सुग्रीवेण सहेति ? भद्रमुख ! भवतो नामधेयमपि मया न पृष्टम् । कथ्यतां सर्वम् ।

हनु – हनुमानिति मम नाम । रामलक्ष्मणौ सुग्रीवेण सह महता वानरसैन्येन कतिपुचिद्दिनेषु आगच्छतः । स्थिरीकर्तव्या भवत्या मनः । रावणो न भविष्यति ।

पत्या सम्मेलिष्यसि अचिरेण । आर्ये ! कालः अतिपतति । इतो गच्छामि । यावद् रात्रिर्न परिणमति तावदेव लङ्कायाः निवर्ते सागरं तीर्त्वा भवत्याः कुशलं रामाय निवेदयिष्यामि ।

सीता – हनुमन्! निदाघसन्तप्तां भुवं प्रथमवर्षासार इव शीतलयसि मे मनः । कतिपयेषु निमेषेषु भवान् मम प्रियो हितो बन्धुश्च संवृत्तः । यथा वनेषु अस्माकमतर्किताः शत्रवः सञ्जातास्तथा भवादृशाः सुहृदश्च । गच्छ वा तिष्ठ वेति न मया वक्तुं पार्यते । बत आप्तबन्धोर्भवतः पानीयमपि न मया उपह्रियते ।

हनु – मा क्लिश्नातु भवती ममार्थम् । अभिज्ञानं दीयतां येन रामो विस्रब्धं मां शृणुयात् तव वार्ताम् ।

सीता – गृह्यतामिदं शिरोभूषणम् । (इति ददाति) एतद् दृष्ट्वा रामस्य आनन्दशोकौ युगपदुद्भवतः । चित्रकूटे गतं काकस्य वृत्तान्तं स्मारय । इषीकां धनुषः प्रयुक्तवान् रामः काके येनाहं विदारिता, काकस्याक्ष्णोरेकं नष्टमभवत् तया हतम् ।

हनु – भवति ! साधयाम्यहं शुभमस्तु भवत्याः । स्थिरीक्रियतामात्मा ।

सीता – रामलक्ष्मणयोः सुग्रीवस्य च कुशलं पृच्छ । शिवास्ते पन्थानः सन्तु । (हनुमान् निष्क्रान्तः ।) नमोऽनर्कितबान्धवाय हनुमते वानरवीराय ।

(यवनिका पतति ।)

पञ्चमः अङ्कः

प्रथमं दृश्यम्

(ततः प्रविशति अमात्यसेनानीभ्रातृपुत्रबन्धुपरिजन-समेतः सभास्थितो रावण ।)

रावण – अयि भो मन्त्रिणः सेनान्यो भ्रातरो बान्धवा हिताश्च । ज्ञातं वो यद् वानरराजः सुग्रीवः सेनासहितो लङ्कामागतः अस्माभिः सह युद्धं चिकीर्षुः, द्वित्रदिनेषु दुर्गोपरोधं करिष्यति । ज्ञायते च रामलक्ष्मणाविति भ्रातरौ तस्य पक्षे स्तः । अतः सर्वे मन्त्रिणः सावधाना भवन्तु सेनान्यः स्वस्वदलैः साकं स्वस्वस्थानेषु अवस्थिताः सन्तु ।

प्रहस्तः – यन्महाराज आज्ञापयति । सर्वाः सन्नद्धा युद्धोत्सुकाः सन्ति वानरसेनां भस्मसात् करिष्याम इति साटोपं गर्जन्ति ।

मकराक्षः – महाराज ! दुर्गावस्थिता वयम् । महता श्रमेण दूरादागता क्लान्ता च शत्रुसेना । अतो लीलया जेष्यामः ।

राव – अमात्येषु सेनानीषु महत्यां सेनायां च दृढप्रत्ययेन युद्धसन्नद्धा वयम् तृणाय मन्यामहे सुग्रीवं रामलक्ष्मणौ च ।

विरूपाक्षः–अद्धा अद्धा ! हनिष्यामः सुग्रीवमथवा जीवग्राहं ग्रहीष्यामः ।

राव – यथा सोत्साहान् सेनान्यः पश्यामः तथा मन्यामहे जितमस्माभिरिति । कुम्भकर्णस्य को वा अभिप्रायः ?

कुम्भ – सोत्साहैर्भवितव्यमस्माभिर्जागरूकैश्च । नाल्पं गणयामः शत्रुपक्षम् । यथा सागरमुल्लङ्घ्यागतास्तथा तर्कयामि तैर्महान् सन्नाहः कृतः । कथं वा शत्रव उपेक्षिताः सागरक्रमणे इति न जाने । तदैव तेषां सेतुं भङ्क्त्वा अभियोगः कार्य आसीन्न तु कृतः । सम्प्रति शत्रवो लङ्कायां प्रविष्टाः शिबिराणि चास्थापयन्निति ज्ञायते । विन्ध्यपर्वतश्रेणीन् परितो बहुषु देशेषु व्याप्ताः सन्ति वानराः । अतो महत्या भवितव्यं शत्रुसेनया । अपि ज्ञायते शत्रुसेनापरिमाणमस्मदपेक्षया ज्याय उत अल्पीय इति ?

प्रहस्तः–चाराः प्रेषिता निरूपयितुम् । नातीव ज्यायसी भवेत् शत्रुसेना ।

इन्द्रजित् – मास्तु सम्भ्रमोऽस्माकं शत्रुसेनायाः संख्यया । विश्रुतपराक्रमा वयम् । वानरसेनेति कियती मात्रा ?

विरू.– यथार्थमाह भर्तृदारकः । न गणयामो वानराणां संख्यामात्रम् ।

राव – प्रमुदितोऽस्मि सर्वेषां युद्धोत्साहेन । ज्ञातं च वो युद्धकारणम् । अस्माकं स्वसा शूर्पणखा परिभूता कर्णनासच्छेदेन दुर्विदग्धाभ्यां रामलक्ष्मणाभ्यां भ्रातरः खरदूषणादयश्च हताः । अतो रामस्य भार्या मया अपहृत्य अशोकवने न्यस्ता । मम पत्नी भवेत्यादिष्टा सा संवत्सरविरतिं याचितवती दत्ता च । मासद्वयान्तरे सा ममावरोधं प्रविशति । एवं स्थिते रामो वानरराजं वालिनं हत्वा, छद्मनेति श्रूयते, सुग्रीवं राज्ये व्यवास्थापयत् । तेनोपकारेण तुष्टः सुग्रीवः स्वसेनया लङ्कामवस्कन्दते ।

मकराक्ष–मत्तौ रामलक्ष्मणौ हन्मः । गृह्णीमः सुग्रीवम् ।

राव – (स्व) किमपि वक्तुकाम इव लक्ष्यते विभीषणः । यदि अभिप्रायं पृच्छयते अस्मत्प्रतीपं वदेत् सेनोत्साहं

च भञ्जयात् । अतो न पृच्छामि विभीषणस्याभिप्रायम् । (प्र) वाढम् । सर्वे स्वनियोगेषु अप्रमत्ता भवन्तु ।

विभी – भ्रातः ! अपृष्टोऽपि हितं वदेदिति अभियुक्तोक्तिमनुसृत्य किञ्चिद् वदामि । समानो वा अधिको वा बलवान् शत्रुरिति प्रत्येतव्यम् । रामपत्नीं हन्तुमभिपतन्ती शूर्पणखा निवार्य विरूपकरणमात्रेण सजीवं मुक्तेति ज्ञायते । अतो बलवता शत्रुणा वैरमुत्सृज्य श्रेयान् सन्धिः कार्य इति विज्ञापयामि ।

इन्द्रजित्–पितृव्य ! ननु स्वसुरवमतिं निगिरति भवान् । अभिसन्धि. को नाम चिन्तितः ?

विभी – सीताया रामाय प्रतिपादनम् ।

राव – विभीषण !

इन्द्र – हास्यमभिहितं पितृव्येण ।

कुम्भ - (स्व) मम चाभिप्रायो विभीषणेन निर्भयं प्रकाशीकृतः । भ्रातरि मिथ्यागौरवेण अहं तूष्णीं स्थितः । भवतु । एतावन्मात्रं हितवचनं ब्रवीमि । (प्र) रामभार्यया निर्बन्धेन शूर्पणखाया अवमानस्य परिमार्जनं कथं भवति ? यदि रामलक्ष्मणौ दण्ड्यौ किं सीताया निर्बन्धेन ?

राव- (स्व) कुम्भकर्णोऽपि विभीषणेन संवदतीव। विभीषणो निर्वचनीकर्तव्यः। (प्र) विभीषण! निश्चितं युद्धं सन्नद्धा च सेना। त्वं यथाशक्ति युद्धयस्व तिष्ठ वा गृहे।

विभी- निरुत्तरोऽस्मि अनेन वाक्येन।

राव- विसृष्टा सभा।

(विभीषणं विहाय अन्ये सर्वे रावणं नमस्कृत्य निष्क्रान्ताः।)

विभी- भ्रातः! सभायामनुक्तं वचनमिदानीं वच्मि। श्रद्धीयताम्। न युज्यते यदनभिलाषिण्याः स्त्रियाः कृते सर्वां सेनां महायुद्धं प्रवर्तयसि जनसंघातवधं च करिष्यसि। राजा नाम प्रजानां रक्षको नहि विनाशकः। अतः सीतां विसृज्य प्रजा रक्ष।

राव- विभीषण! न मर्षये ते दुर्वचांसि। (स्व) एवं नाम विभीषणः अपृष्टोऽपि मम प्रतिकूलं स्वमतं भूयो भूयः उपन्यस्यति सर्वेषामपि समरसंरम्भं विनाशयति। निष्कासयाम्येनम्। (प्र) यदि कश्चिदन्य एवं ब्रूयात् सद्यः शिरश्छेदः क्रियेत। सोदरप्रणयो मां शालीनयति। गच्छेतः। लङ्काया निर्गम्यताम्। अद्य सायं त्वया लङ्कायां न भवितव्यम्। (इति निष्क्रान्तः।)

विभी- का गतिः ? भ्रातृवत्सलः केवलं कुम्भकर्णः तस्य दुश्चेष्टितानि सहते न किमपि वदति । दुष्टः सोदरोऽपि दण्ड्यः । हितवचनैरविनीतो भ्राता बलेन दम्यः । दुर्विनीताः कर्कशा अधुना लङ्कां शासति । कुशासनाल्लङ्का मोचयितव्या । राममाश्रये ।
(इति निष्क्रान्तः ।)

(यवनिका पतति)

द्वितीयं दृश्यम्

(ततः प्रविशति रामः सुग्रीवो विभीषणो जाम्बवांश्च ।)

रामः- सखे सुग्रीव ! आसन्नं महद् युद्धम् । न केवलमस्माकं दौत्यं विफलमभूत् प्रत्युत दूतः अङ्गदः परुषवचनैर्निरस्तः । महानस्माकं शुभोदर्को यदत्रभवान् विभीषणो रावणसोदरः अस्मत्पक्षमायातः प्रतिश्रुतं च लङ्काराज्यमस्मै ।

सुग्री- सर्वं साधुकृतमस्माभिरेतावत् । विभीषणसूचितेन मार्गेण दुर्गभेदं कुर्मः । दीयतामनुमतिः समरारम्भाय ।

रामः- यथा भवान् मन्यते ।

सुग्री- जाम्बवन् ! सूचना दीयतामङ्गदाय अभिषेणयितुम् । त्वमपि युद्धवार्ताः कथयास्माकम् ।

जाम्ब– यदाज्ञापयति महाराजः।(निष्क्रम्य प्रविश्य) महाराज! प्रचलति दारुणं युद्धम्। दुर्गभेदस्य महान् प्रयत्नः क्रियते अस्माकं सेनया। लक्ष्मणसहायेनाङ्गदेन मध्ये हनुमन्नीलाभ्यामुभयपार्श्वयोश्च सेना नीयते। (इति निष्क्रान्तः।)

रामः– सखे विभीषण! आमध्याह्नं प्रवृत्तः समरः।

जाम्ब– (प्रविश्य) जयतु जयतु महाराजः सुग्रीवः। दुर्गो भिन्नः। राक्षससेना अपक्रमते। घोरे संग्रामे हनुमता हतो धूम्राक्ष अङ्गदेन वज्रदंष्ट्रश्च।

सुग्री– अहो महत् कर्म कृतं पुत्रकेणाङ्गदेन यत्प्रथमे अहनि युद्धस्य दुर्गभेदः कृतः।

रामः– श्रूयते महान् कोलाहलः। ज्ञायतां किन्निमित्त इति।

जाम्ब- (निष्क्रम्य प्रविश्य) रावणेनाभिद्रुता अस्मत्सेना पलायते। अङ्गदः सेनामवष्टभ्य रावणमभिपतति।

सुग्री- मा मा बालो रावणमभियातु। अहं रावणं हन्मि।

(इति निष्क्रान्तः।)

रामः– जाम्बवन्! ज्ञायतां समरप्रवृत्तिः।

जाम्ब- (निष्क्रम्य प्रविश्य) अत्याहितमत्याहितम् । पतितः अङ्गदः ।

रामः- ननु पतितः अङ्गदः ?

जाम्ब- अथ किम् । सम्प्रति हनुमद्रावणयोर्मुष्टियुद्धं प्रचलति । बलवत्ताडितो रावणो हनुमता । (निष्क्रम्य प्रविश्य) हा धिक् हा धिक् पतितो हनुमान् । अधुना सुग्रीवेण अभियुक्तो रावण.। (निष्क्रम्य प्रविश्य) सुग्रीवमपसार्य लक्ष्मणो रावणमभियुङ्क्ते (निष्क्रम्य प्रविश्य) हा हतो लक्ष्मणः ।

रामः- हतो मे भ्राता लक्ष्मणः ! जाम्बवन् ! अपि हतो मे भ्राता लक्ष्मणः ?

जाम्ब- रावणे। शक्त्या कृतप्रहारो लक्ष्मणो मृतः अपतत् ।

रामः- हतो लक्ष्मणः ! हतो राम इति च भण । हा लक्ष्मण ! सर्वदा मामनुसरसि । अद्य मां हित्वा कथं त्वं पुरस्सरो गतः ? देहि मे प्रतिवचनम् । ब्रूहि किं वक्ष्यामि मातुः सुमित्रायाः कुत्र मे सुतो लक्ष्मणो यस्त्वामनुसृतो वनमिति मां पृच्छन्त्याः ? व्यर्थं निर्मितः सेतुः लङ्का दुर्गश्च भेदितः ।

मैन्दः- (प्रविश्य) मा विषीद मा विषीद राम । मूर्छितो लक्ष्मणो न तु हतः । अस्मद्वैद्येन सुषेणेन उल्लाघं नीयते पुनश्च सुग्रीवरावणयोः युद्धं प्रचलति ।

रामः— अहं निरुन्धे रावणम् । (इति निष्क्रान्तः ।)

मैन्दः— अहमपि रावणमभिद्रवामि । (इति निष्क्रान्तः ।)

(ततः प्रविशति रामो लक्ष्मणः सुग्रीवश्च ।)

सुग्री— साधु कृतं राम त्वया साधु कृतम्। पराजितो मूर्छितो रावणः सारथिना अपवाहितः। अस्मत्सेना राक्षससेनामनुद्रवति ।

रामः— परिणतो दिवसः । अपि सेनां निवर्तयामः ? विभीषण ! किं करणीयं भवान् मन्यते ? सुग्रीव ! कस्ते अभिप्रायः?

विभी— भिन्नो दुर्गः । अतोऽहं मन्ये प्रवर्ततां नक्तमपि आक्रान्तिर्यावदस्मत्स्थानानि स्थिरीकुर्मः ।

सुग्री— साधु मतिर्दत्ता विभीषणेन ।

रामः— यद् भवद्भ्यां रोचते ।

सुग्री— जाम्बवन् ! अङ्गद उच्यतां प्रवर्ततां युद्धं रात्रावपीति।

(यवनिका पतति)

तृतीयं दृश्यम्

(ततः प्रविशति रावणः।)

रावणः – धिग् धिगस्मान् । विषादविस्मयावहोऽस्माकं सैन्यभङ्गो ह्यो युद्धे। एकाहे दुर्गो भिन्नः । सागर-परिवृतस्य सुरक्षितस्य लङ्का दुर्गस्यापि आक्रमणं नाम कृतं लीलया शत्रुभिः। नूनं विभीषणस्यैवोपदेशेन दुर्गभेदः कृतः शत्रुणा। महान् प्रमादः कृतो मया यद् विभीषणस्य शिरश्छेदो न कृतः। सोदरमभि-द्रुह्यति विभीषणः। कः कोऽत्र द्वारे तिष्ठति ?

शुकः - (प्रविश्य) महाराज ! एषोऽस्मि शुकः ।

राव – अपि सारण आगतो युद्धभूमेः ?

सारणः – (प्रविश्य) जयतु जयतु महाराजः । घोरः समरः प्रचलति प्रहस्तविभीषणयोः अतिकायलक्ष्मणयोः मकराक्षरामयोश्च ।

राव – शुकसारणौ ! युवां गच्छतम्। युद्धवार्ता यथा-संभवमानयतम् ।

शुकसारणौ – यद् देव आज्ञापयति। (इति निष्क्रान्तौ।)

शुकः – (प्रविश्य) महाराज ! हतः प्रहस्तः ।

राव – हा धिक् । अपि मम महामन्त्री प्रहस्तो हतो मे सोदरेण ?

शुकः - हतो विभीषणेन । (निष्क्रान्तः ।)

सार – (प्रविश्य) महाराज ! हतो मकराक्षो रामेण ।

राव - ननु हतो मकराक्षो रामेण ?

सार – महाराज हतो मकराक्षः । (निष्क्रान्तः ।)

शुकः – (प्रविश्य) बत बत हतः अतिकायो लक्ष्मणेन ।

राव किं वक्षि ? हतो मे पुत्रः अतिकाय इति ?

शुक - अथ किम् । (इति निष्क्रान्तः ।)

राव – हा हतो मे पुत्रः अतिकायो लक्ष्मणेन । हा पुत्र ! देहि मे प्रतिवचनम् । हा धिक् हा धिक् । हतो मे पुत्रः ।

सार – (प्रविश्य) जयतु जयतु महाराजः । वानरसेनां विद्रावयति कुमारः इन्द्रजित् ।

राव – कथय कथय । अपि वानरसेनामाक्राम्यति मे पुत्र इन्द्रजित् ?

सार - प्रसभमाक्रमते । (निष्क्रान्तः ।)

शुक – (प्रविश्य) अहो पलायते वानरसेना कुमारस्येन्द्रजितः पराक्रममसहमाना ।

राव – भण भण । अपि पलायन्ते सर्वे वानरनायकाः ?

शुक – पलायन्ते । (निष्क्रान्तः ।)

सार – (प्रविश्य) जयति महाराजः । पातितः अङ्गदः इन्द्रजिता पराजितो नीलः । (निष्क्रान्तः ।)

शुक (प्रविश्य) जयति महाराजः । पातितो हनुमानिन्द्रजिता । (निष्क्रान्तः ।)

राव – अहो मे पुत्रस्य शौर्यं येनैकेन सर्वे वानरनायकाः पातिताः ।

सार – (प्रविश्य) जयति जयति महाराजः । हतौ रामलक्ष्मणौ कुमारेणेन्द्रजिता पराजितश्च सुग्रीवः ।

राव – हतौ रामलक्ष्मणौ कुमारेणेन्द्रजिता ! अहो जितमस्माभिः हताः पराजिताश्च रिपवः । गृह्यतामुपहारः । (रत्नहारं तस्मै ददाति) घुष्यतां विजयवार्ता नगरे । वृद्धाः अभिगच्छन्तु पुत्रस्याशिषं ब्रुवन्तु । पुरन्ध्र्यः कन्याश्च गच्छन्तु तस्य स्वस्तिवाचनं कुर्वन्तु । अहो मे प्रियपुत्रस्येन्द्रजितः पराक्रमो येन रामलक्ष्मणौ युगपद् हतौ । राजाधिराजो भविता मे कुमारो येन देवी मन्दोदरी वीरपुत्रास्ति । अहो ह

रामो मनश्शल्यं चोद्धृतं मम । अशोकवनं गत्वा सीतां वदामि हतो रामो मां स्वीकुरु इति । अथवा नेदानीमेव गच्छामि । विलपतु कतिपयदिनानि अनन्तरं च मम वशमायातु ।

सार – अयमयमागच्छति विजयी कुमारो भवन्तमभिवादयितुम् ।

(ततः प्रविशति युद्धविजयहृष्ट इन्द्रजित् ।)

इन्द्र – तात वन्दे ।

राव – चिरं जीव पुत्रक ! रामलक्ष्मणौ हतौ पराजितः पलायितश्च सुग्रीवः । श्लाघनीयं कर्म कृतवानसि । परिष्वजस्व पुत्रक मां परिष्वजस्व । (परिष्वजते) । अद्य प्रभृति उरसि हस्तं निधाय स्वपिमि । पुत्रक ! श्रान्तोऽसि । गच्छान्तःपुरम् । विश्राम्य । यदल्पकार्यमवशिष्यते अन्ये तत् करिष्यन्ति ।

इन्द्र – यदाज्ञापयति तातः । (निष्क्रान्तः ।)

राव – अहो महासाम्राज्याधिपतिर्भविष्यति मे पुत्र इन्द्रजित् ।

शुकः – (प्रविश्य) महाराज ! सुग्रीवो हनुमन्नीलाभ्यां सह पुरस्तादायाति ।

रावण - ननु सुग्रीव आयाति सानुचरो मम दर्शनार्थम् ? न द्रक्ष्यामि सुग्रीवम् । किं कर्तुमायति ? अपि सन्धिं कर्तुम् ? सन्धिर्न क्रियते । गृह्यतां सुग्रीवः । अथवा क्रियते सन्धिः । तारा मम समर्प्यताम् ।

शुकः- महाराज ! संधिं कर्तुं नायाति सुग्रीवः । अस्मत्सैन्य-मभिद्रवति ।

रावण पराजित्य गृह्यतां सुग्रीवः । अङ्गदेन सह कारायां पात्यताम् ।

शुकः- (निष्क्रम्य प्रविश्य) महाराज ! न हि हतौ रामलक्ष्मणौ मूर्छितावधुना पुनरुत्थितौ अस्मत्सेनां हतः ।

रावण- किं वक्षि ? रामलक्ष्मणौ न हताविति ?

शुक- महाराज ! अथ किम् ।

रावण- गच्छ । कुम्भकर्णं मद्वचनाद् वद युद्धयस्वेति ।

शुक - यद्देव आज्ञापयति । (निष्क्रान्तः ।)

रावण- सारण ! ज्ञायन्तां युद्धवार्ताः ।

सारण- यन्महाराज आज्ञापयति । (निष्क्रम्य प्रविश्य) महाराज ! हतो महोदरः सुग्रीवेण महापार्श्वः अङ्गदेन च !

राव- ननु हतौ महोदरमहापार्श्वौं सुग्रीवाङ्गदाभ्याम् ?

सार- अथ किम् । (निष्क्रम्य प्रविश्य) महाराज ! हतो वज्रवेगो हनुमता प्रमाथी च नीलेन ।

राव- किमिति किमिति ? हतौ वज्रवेगप्रमाथिनी एको हनुमता अन्यो नीलेन च ?

सार- अथ किम् । (निष्क्रम्य प्रविश्य) महाराज ! हतौ मयूरबकौ एको लक्ष्मणन अन्यो रामेण च ।

राव- अपि हतौ महावीरौ बकमयुरौ रामलक्ष्मणाभ्याम् ?

सार- महाराज ! हतौ । (निष्क्रान्तः ।)

शुक- (प्रविश्य) जयतु महाराजः । वानरसेनां हन्ति सोदरः कुम्भकर्णः ।

राव- ब्रूहि ब्रूहि । अपि हन्यते वानरसेना कुम्भकर्णेन ?

शुक- सुष्ठु हन्यते (निष्क्रान्तः ।)

सार- (प्रविश्य) जयति महाराजः । पातितौ हनुमदङ्गदौ कुम्भकर्णेन ।

राव- गच्छ गच्छ । ज्ञायतां यत् प्रवर्तते । (सारणो निष्क्रान्तः ।)

शुक– (प्रविश्य) जयतु महाराजः । हतौ पनसगवाक्षौ वानरनायकौ सोदरेण कुम्भकर्णेन ।

राव– किमिति ? किमिति? हतौ पनसगवाक्षौ कुम्भकर्णेन ?

शुक– महाराज ! हतौ ! (निष्क्रान्तः ।)

सार– (प्रविश्य) जयतु जयतु महाराजः । गृहीतः सुग्रीवः कुम्भकर्णेन ।

रावणः– हन्त । गृहीतः सुग्रीवः सोदरेण । गृह्यतां बहुमानम् । (रत्नहारं प्रयच्छति । सारणो निष्क्रान्तः ।)

शुकः– (प्रविश्य) मुक्तः सुग्रीवः ।

राव– कथं मुक्तः ? केन मोचितः ?

शुकः– स्वयं मोचितः । कुम्भकर्णं प्रहृत्योत्प्लुत्य पलायितः ।

राव– बत स्तोकात् त्रस्तः सुग्रीवः । ज्ञायन्तामपरा वार्ताः । (शुको निष्क्रान्तः ।)

सार– (प्रविश्य) हा धिक् हा धिक् । हतः कुम्भकर्णः ।

राव– हतः कुम्भकर्णः ? केन ? रामेण उत लक्ष्मणेन ?

सार– केन हत इति न सम्यग् ज्ञायते । एके रामेणेति वदन्ति अपरे लक्ष्मणेनेति ।

राव– बत सोदरो मे कुम्भकर्णो हतः । ननु सारण ! अमू यमौ रामलक्ष्मणौ ध्रुवं द्वौ यमाविव सम्प्राप्तौ अस्मत्सर्व-बन्धुविनाशाय ।

सार – महाराज ! रामलक्ष्मणौ न यमौ नापि सोदरौ ।

राव – कौ पुनस्तौ ?

सार – केवलं भ्रातरौ वैमात्राविति श्रूयते ।

राव – नापि सोदरौ ? केवलं वैमात्रौ भ्रातरौ ? तथापि एवमनुरक्तो लक्ष्मणो ज्यायसि भ्रातरि ? मम तु सोदरो विभीषणो महान् शत्रुः सञ्जातः ।

शुक – (प्रविश्य) महाराज ! रामलक्ष्मणौ अमृतौ पितृव्यं हतं च विज्ञाय कुमार इन्द्रजित् पुनर्युद्धभूमिमवतीर्णः ।

राव – ननु कुमारः पुनर्युद्धभूमिं गतः ? ज्ञायतां ज्ञायतां कः को वा शत्रुर्निहतो मे पुत्रेणेति । (शुकसारणौ निष्क्रान्तौ ।)

शुक – (प्रविश्य) अहो शौर्यं कुमारस्येन्द्रजितः । पलायन्ते शत्रवः ।

राव – गच्छ गच्छ । जानीहि के के हताः कुमारेण । यो मां प्रथमं वदति रामं हतं तस्मै विंशतिर्ग्रामा दीयन्ते

यश्च लक्ष्मणं हतं वदति तस्मै दश ग्रामाः ।

(शुको निष्क्रान्तः ।)

सार – (प्रविश्य) महाराज ! कुमारलक्ष्मणयोर्महान् समरः प्रचलति । सर्वे विरम्य युद्धात् तयोर्द्वन्द्वं पश्यन्ति ।

राव – उत्कण्ठितोऽस्मि । गच्छ गच्छ । ज्ञायतां ज्ञायताम् । अपि हतो लक्ष्मणः ?

सार – (निष्क्रम्य प्रविश्य) अहो कुमारस्य युद्धनैपुण्यम् । क्षतविक्षतो लक्ष्मणः कुमारेण ।

राव – भण भण । शीघ्रं भण हतो लक्ष्मण इति । अहो मे पुत्रको राजाधिराजो भविता ।

शुक– (प्रविश्य) हा हा अत्याहितमत्याहितम्! महाराज ! हतः कुमार इन्द्रजित् लक्ष्मणेन ।

राव - (मोहमुपगम्य पतितः । पुनश्चेतनां लब्ध्वा उत्थाय) हा हा हतो मे पुत्रकः। किं वदसि? हत इन्द्रजिदिति? मा तावत् । प्रार्थये त्वाम् । वद इन्द्रो हत इति, वद कुबेरो हत इति, वद वरुणो वायुरग्निर्हत इति । वद अष्टौ दिक्पाला हता इति । इन्द्रजित् मे कुमारो हत इति मा भण मा भण । शुक ! अपि सत्यं ब्रवीषि ? ननु हतो मे पुत्रक इन्द्रजित् ?

शुक – महाराज ! हत इन्द्रजित् । शून्यो रथः प्रतिनिवृत्तः ।

राव – हत इन्द्रजित् ! हतो मन्दोदरीवीरपुत्रः ! हतः साम्राज्याधिपत्यार्हः ! हतः पितृविधेयः! हतो मनोहराकारः ! शुक ! पुनः सम्यगवधार्य ब्रूहि । अपि हतो मे पुत्रकः ?

शुक – महाराज ! हतः कुमारः सेना च हतशेषा दुःखमग्ना निवृत्ता ।

राव – हा हतो मे पुत्र इन्द्रजित् । क इदानीं मामभिवादयति हासपूर्णेन मुखेन ? कस्य कृतेऽहं जीवामि ? किं मे राज्येन ? शुक ! कोऽयं रोदनध्वनिः कुतो निस्सरति ?

शुक – अन्तःपुरात् ।

राव – दुःखभागिनी मन्दोदरी रोदिति । अहं तावत् तां सान्त्वयिष्यामि । धिङ मां धिङ माम् । कथमहं मन्दोदरीमुपसर्पामि ? लज्जाहीनोऽहं कथं तस्याः पुरः पुनरपि तिष्ठामि मुखं च दर्शयामि ? मां पश्यन्त्याः तस्याः शोको विवर्धेत न हीयेत । न गच्छाम्यन्तःपुरम् । इहैव तिष्ठामि । शुक ! कञ्चुकी वलाकः कुत्र वयस्यश्चन्द्रश्च ?

शुक – महाराज ! वलाकस्यैक एव दौहित्रः सोऽपि ह्यो युद्धे हतः । अतोऽद्य शोकात् स न आगतः । चन्द्रः

पूर्वाह्णे आगतः तस्य द्वावपि पुत्रावद्य युद्धे हतौ श्रुत्वा गृहं गतः।

राव – ननु चन्द्रस्य द्वावपि पुत्रावद्य हतौ ?

शक - महाराज ! एवं श्रुतम् ।

राव - केन हतौ ? रामेण उत लक्ष्मणेन उत एकैक एकैकेन ? वत चन्द्र ! अपुत्रकः संवृत्तस्त्वमपि अहमिव । इदानीं तुल्यावस्थावावाम् । न न । ममापेक्षया त्वमेव धन्यः । भार्यां सान्त्वयितुं गृहं गतस्त्वं तया सह पुत्रशोकं विभजसे । नाहं मन्दोदरीसकाशं गन्तुं प्रभवामि लज्जया न कोऽपि मामिह सान्त्वयति । हा धिक् । स्वहस्तेन पुत्रो वध्य-स्थानं प्रापितो मया नाम रावणहतकेन । अयि मन्दोदरि ! विलप विलप । पुत्रमृतिं भर्तुः नृशंसत्वं च स्मारं स्मारं रुदिहि रुदिहि । शिलाम् अयस्स्तम्भं वा त्वं परिणीतवती न मानवम् । अनर्हो रावणस्तव पादनखस्यापि । का नाम स्त्री मादृशं भर्तृहतकं सहते त्वां विना ? यदा यदा एकैकशः स्त्री बलादाहृता मया एकैकशः क्षतिः कृता ते मनसि । सन्ति तव स्वान्ते समन्ततो भर्तृकृताः क्षतयः । यथा जात इति तस्मिन् प्रीणाति माता तथा पतिरित्यपि तस्मिन् स्निह्यति भवादृशी स्त्री । नार्हति विनाशयति च तत्प्रेम मादृशो मूर्खः । भो भो वर्तमाना भाविनश्च चरित्रकारास्तथा

कवयः । विस्तृते जगति कस्मिंश्चित् स्थले जलपरिवृते ऽल्पदेशे लङ्कायां यानि दुष्कृतानि मया कृतानि तानि कृतानि नाम । तेषां दुष्फलमद्य मयानुभूयते । मा भवन्तो मामतिशयोक्तिभिर्विपरिणामैश्च मूर्तीभूत-क्रौर्यरूपणेन वा विकृताकारकल्पनेन वा वर्णयन्तु । सन्ति. भविष्यन्ति च मत्तः क्रूरतराः क्रूरतमाश्च लोके । अथवा वर्णयत वर्णयत यथाकामम् । को नाम निवारयतु ? भीरुरिति तु कोऽपि मां न कथयतु । श्वः मम पराक्रम प्रदर्शयिष्यामि येन सकलं जगद् विस्मेष्यते । यदि रामं हनिष्यामि तदा मम दुश्चेष्टितानि कानिचन मम विजयनावृता-न्यपि भविष्यन्ति । विजयी किल लोके महीयते । एकगुणाश्रयिणी किल लोके नरस्य कीर्तिस्तस्यान्यानव-गुणानाच्छादयेदपि । शुकसारणौ ! सर्वे हतशेषा आदिश्यन्तां श्वः रावणः सेनां नेष्यति सर्वे सन्नद्धाः सन्तु इति ।

शुकसारणौ–यद्देव आज्ञापयति ।

(इति निष्क्रान्तौ ।)

(यवनिका पतति)

चतुर्थं दृश्यम्

(ततः प्रविशति रामः लक्ष्मणः विभीषणः अविन्ध्यः जाम्बवान् वानरनायकाश्च ।)

रामः – अयि भोः सुहृदः । दिष्ट्या जितमस्माभिः । रावणो हतः । अवसिताद्य आवयोर्वैरकथा यतो मरणान्तानि भवन्ति वैराणि । मृतं सहकुटुम्बं रावणमनुशोचामः सर्वान् लङ्कानिवासिनः अस्माकं मित्राणि सम्भावयामः । सम्प्रति लङ्काराजो विभीषणो भ्रातृमरणदुःखितः समाश्वासयितव्यः । मित्र विभीषण ! अपनीयतां शोको मनसः । सर्वश्च प्राणी निधनं गच्छत्येव । क्रियतां भ्रातुर्देह-संस्कारः ।

विभी– राम ! मम जनुषो दौर्भाग्यमिदं यदेवं हतस्य भ्रातुर्बन्धुवर्गस्य च देहसंस्कारं करोमि ।

रामः –उपस्थापयास्मानं विभीषण ! मृतस्य सुकृतान्येव स्मर्तव्यानि यत इह जगति मृतो वृजिनातीतः । के नाम वयं सजातीयस्य मानवस्य गुणदोषनिर्णये ? एकेनापि गुणेन वा दोषेण वा नरो जगति कीर्तिमप-कीर्तिं वा प्राप्नुयात् । अतः अन्ततो दैवमेव प्रमाणम् ।

सुग्रीव ! भवन्तः सर्वे अनुगच्छन्तु रावणस्य निर्हारं विधातुम् । अहं तु पितुराज्ञया नगरं न प्रविशामि ।

सुग्री – एवं कुर्मः ।

(रामलक्ष्मणौ विहाय अन्ये सर्वे निष्क्रम्य प्रविशन्ति ।)

राम – विभीषण ! अथ सीता आनीयताम् ।

विभी– तथा । अविन्ध्य ! तत्रभवती सीता आनीयताम् ।

अवि – यन्महाराज आज्ञापयति । (निष्क्रम्य मलिनवसनया कृशया जटिलया सीतया सह प्रविशति ।) महाराज ! आगता अत्रभवती सीता ।

सीता – आर्यपुत्र ! (इति मुक्तकण्ठं क्रन्दति ।)

राम – सीते ! समाश्वसिहि, समाश्वसिहि ।

परिणमय नितान्तोद्वेगजाताश्रुबिन्दून्
हृदयकुहरपूर्णान् सम्प्लुतान् हर्षबाष्पान् ।
इह न समय आर्तेः प्राप्त आनन्दकालो
विगतजननवत्ते विस्मृतिं यातु शोकः ।।

एवं नाम जीवितं सुखदुःखसम्मिश्रं प्रचलति यथा दिनं कान्तिच्छाययोः । अभिवादयस्व प्रियमित्रं सुग्रीवं

वानरराजं यः पुनरपि त्वां मह्यं प्रदाय ते पितृ-
स्थानीयः संवृत्तः ।

सीता – आर्य ! अभिवादये ।

सुग्री – भवति! अभिवादये ।

राम – अभिवादय अत्रभवन्तं लङ्काराजं मित्रवर्यं विभीषणम् ।

सीता – आर्य ! अभिवादये ।

विभी – आर्ये ! अभिवादये ।

राम – अभिवादयस्व पूर्वपरिचितं सुहृत्तमं हनुमन्तं येन कृतेन महोपकारेण वयं शश्वदधमर्णाः संवृत्ताः यस्य च समागमः अस्माकं कोऽपि भाग्यविशेषः ।

सीता – आर्य ! अभिवादये ।

हनु – भवति ! अभिवादये ।

राम – सीते !

नामाक्रोशं सकलविपिनं यन्मयान्वेषिताऽभूः
उन्मादीवाचलतरुसरोनिम्नगाः पर्यपृच्छम् ।
बद्धः सेतू रिपुरपि हतो भूयसैव श्रमेण
सर्वं कष्टं तदपगमितं त्वन्मुखे दृश्यमाने ॥

Sringeri
LIBRARY
ACC. NO. 18983
DATE 27/2/18

सीता – सर्वः क्लेशो मयैवोत्पादितो मायामृगस्पृहेन चापल्येन ।

राम – ममैव दोषो लक्ष्मणेन निवार्यमाणस्यापि मायामृगमनुधावतः ।

सीता – पुनश्च मया कृतो दोषो यल्लक्ष्मणमनुचितवचनैः प्रस्थाप्य स्वयमेकाकिनी संवृत्ता विजने वने ।

लक्ष्म – ममायं दोषो यद् भयाकुलचित्ताया उक्तं परमार्थतो गृहीत्वा असहाया विसृष्टा आर्या ।

राम – सर्वे वयं दोषिणः । यद् वृत्तं तद् वृत्तम् । यद्यपि क्लेशः अनुभूतः तथापि सर्वं सुपरिणतं मित्रलाभेन । यदि गोदावरीतीरादेवायोध्यां निवृत्ता भवेम कथं नामास्माकं सुग्रीवो हनुमान् विभीषणोऽन्ये च सुहृदो भवेयुः ? विभीषण ! अस्मान् भवाननुजानातु स्वदेशनिर्गमनाय । अभिषिक्तो लङ्कां शास्तु भवान् ।

विभीं – यदाज्ञापयति भवान् ।

सुग्री – राम ! मम किञ्चिद् विज्ञापनीयम् । मित्रपरिवारसहितस्त्वामहमयोध्यामनुगन्तुमिच्छामि तेऽभिषेकं दिदृक्षुः । अनुमन्यताम् ।

विभी – एवमेव ममाप्यभिलापः ।

राम – सभाजितोऽस्मि मित्रयोः प्रणयेन। सुग्रीव ! यूयं नगरं प्रविश्य विभीषणस्याभिषेकं कुरुत। अनन्तरं सर्वे वयमयोध्यां गमिष्यामः।

सुग्री – तथा।

(यवनिका पतति।)

पञ्चमं दृश्यम्

(ततः प्रविशन्ति रामलक्ष्मणभरतशत्रुघ्नाः वानरनायकाः जाम्ववान् विभीषणो वसिष्ठः सुमन्त्रश्च।)

वसिष्ठः – राम ! दिष्टया भार्याभ्रातृभ्यां सह निवृत्तो भवान् वनात्। अथ पितुरभीप्सितं पूरयितव्यम्। अतः अनुमन्यतामभिषेकः।

रामः – यद् गुरुपादा आदिशन्ति।

वसिः – सुमन्त्र ! आगामिनी पञ्चमी शुभदिनमस्ति रामस्य राज्याभिषेकाय।

सुमः – कोऽत्र द्वारि तिष्ठति ?

नन्दकः – (प्रविश्य) आर्य ! एषोऽस्मि नन्दकः।

सुमः – घुष्यतां सर्वत्र राज्ये सीतालक्ष्मणसहितस्य रामस्य वनात् प्रतिनिवर्तनमागामिन्यां पञ्चम्यां रामस्य राज्याभिषेकश्च।

नन्दकः – यदमात्य आज्ञापयति। (निष्क्रम्य प्रविशति।)

सुमः – नन्दक ! अपि घोषितं सर्वत्र ?

नन्दकः– घोषिता स्वीकृता च रामाभिषेकवार्ता सर्वैर्जनै-रानन्दपूर्णमानसैः। जना रावणवधं पत्नीरक्षणं च सहस्रमुखैः प्रशंसन्ति। (ससंशयं पश्यन्) किन्तु ....

सुमः – किन्तु इति सन्देहमिव जनयसि।

रामः – भद्र ! स्वैरं भण्यताम्।

नन्दकः– द्वित्रस्थलेषु कैश्चिदुक्तं यद् रावणगृहे स्थितां सीतां विसृज्यान्यां परिणेतुमर्हति राम इति क्षन्तुमर्हति मां भवान् येन यत् श्रुतं तन्निवेदितम्।

रामः – अये वाचालः खलु लोकः। जिह्वाग्रात् प्रसरत्ति जन-वाणी। विवाहे परस्परं शिरसि हस्तं निधाय पाणौ पाणिं पगृह्य च सप्रतिज्ञं सहचरता स्वीक्रियते दम्पतिभ्याम्। प्रव्रजितुमपि भार्याया अनुमतिमपेक्षते पुरुषः तत् कथं विसृजेन्निर्दोषां ताम् ? न त्यजामि सीतां सर्वास्ववस्थासु मम सहचरीम्। प्रेम्णा साहचर्येण च न विसृजामि सीताम्। वनस्थिते मयि राज्यं भरतेन पालितं प्रजाश्च संतर्पिताः। पूर्वं मया यत् त्यक्तं तस्यैव राज्यस्येदानीमस्वीकरणे नास्ति दोषः। नन्दक ! घुष्यतां पुनः सर्वत्र राज्ये यद् रामः सीतया सह वानप्रस्थाश्रमं स्वीकरोति भरत एव राज्यं प्रशास्तीति।

नन्दकः – यदाज्ञापयति रामः। (निष्क्रम्य प्रविश्य) राम! श्रुत्वेव घोषणं जनाः सन्दोहैरागता व्याकुला भवन्तं राजानं सीतां च देवीमभिलषन्तः त्वामेवं प्रार्थयन्ते च।

वसिष्ठः – राम! भगवन्तमपि केचन निन्दन्ति। न श्रद्धेयं कतिपयवाचालानां वचनम्। बहुमन्यतां जन-बाहुल्यस्य मनोरथः।

रामः – यदाज्ञापयन्ति गुरवः। सर्वमस्माकं शुभं संवृत्तम्। पुनरेवमाशासे।

(भरतवाक्यम्)

आचारश्च मतं चैव संप्रदायस्तथा क्षितौ।
नैव जह्यान्मनुष्यत्वं मानवत्वं हि दैवतम्॥

(यवनिका पतति।)

सीताहरणं नाटकं समाप्तम्।

अनुबन्धः

रामायणसमालोचनम्

आदिकाव्यं रामायणं यद्यपि सुलभया शैल्या विरचितं तथापि पाठकानां बह्वीः समस्याः जनयति। काव्यस्य अत्यन्तप्राचीनता कासाञ्चन समस्यानां कारणमस्ति। बह्वचः समस्या आ काव्यरचनाया महता प्रमाणेन तस्मिन् काव्ये पातितैः प्रक्षिप्तैः, कृतैः परिवर्तनैश्च समुत्पन्नाः सन्ति।

रचनानन्तरं बहुशताब्दपर्यन्तमपि गेयरूपेण प्रचारितं भवेद्रामायणम्। तदा गायकैः स्वाभिप्रायानुसारेण सामाजिकानामभिरुचिमनुसृत्य च बहूनि परिवर्तनानि उपबृंहणानि च कृतानि भवेयुः। पश्चाच्च लिपिबद्धापि कृतिः बहुशताब्दान् यावत् प्रतिलिपिकरैर्यथेच्छं परिवर्तितं परिवर्धितं च स्यात्। एतत्पर्यवसानेन राष्ट्रस्य विभिन्नप्रदेशेषु काव्यस्य विभिन्नाः पाठाः समजायन्त। भारतीयसाहित्यस्य महती सेवा कृता वटोदरनगरस्थया प्राच्यसंस्थया यया बहुपाठपरिशीलनं कृत्वा रामायणस्य प्रामाणिकी प्रतिः प्रकाशिता। गीताप्रेस्प्रकाशितस्य रामायणस्य अयोध्यारण्यकिष्किन्धाकाण्डानां प्रथमसर्गश्लोकाः क्रमशः ५१, २३, १३० च सन्ति।

प्रामाणिकप्रतौ त एव क्रमशः ३७ २२, ४९ च सन्ति । किञ्च प्रतिपत्रं मूलं चतुर्थभागे मुद्रितमस्ति सर्वस्मिन् शेषपत्रे पाठान्तराणि दत्तानि विद्यन्ते । एवं च प्रामाणिकप्रतेर्विहङ्गावलोकनेनापि ज्ञायते कियन्ति खलु परिवर्तनानि विवर्धनानि च रामायणे सन्तीति ।

किन्तु प्रामाणिकप्रतिः अर्वाचीनपाठान्तरविवेचनमात्रमेव करोति न तु समस्याः परिष्करोति । रामायणमूलग्रन्थ एव बहुसमस्यासङ्कुलो वर्तते ।

प्रथमः प्रश्न उद्भवति रामायणकविर्वाल्मीकिः कदा आसीदिति । सांप्रदायिको विश्वासो वाल्मीकिः रामस्य समकालिक इति । अयं विषयः परिशीलनीयः ।

काव्यारम्भे कविर्वाल्मीकिर्नारदं पृच्छति 'कोन्वस्मिन् साम्प्रतं लोके ...' (1, 1, 2)[1] इत्यादि । यदि वाल्मीकिः रामस्य समकालिकः अभविष्यत् स रामं स्वयमेवाज्ञास्यत् इत्थं च नाप्रक्ष्यत् । एतदप्युक्तं यद् लङ्काया निवृत्य राज्यं शासति रामे वाल्मीकिः रामायणं प्रणिनायेति । रामस्य सर्वमितिवृत्तं सहोत्तरं रचयामास वाल्मीकिः प्रणिधानेन किल रामस्य भविष्यकथां विज्ञायेति यद्येवं स्यात् तर्हि रामजननात्

1. श्लोकसङ्ख्याः बरोडाप्रतिमनुसृत्य दत्ताः ।

पूर्वमेव प्रणिधानवता कविना तस्य सम्पूर्णा कथा किं न रचिता स्यात् ?

रामस्य नाम ऋग्वेदस्य दशममण्डले त्रिनवतितमे सूक्ते दृश्यते। स ऋग्वेदोक्तो रामो रामायणीयो रामश्च समौ उत भिन्नाविति निश्चितं न ज्ञायते। उभावपि यदि अभिन्नौ तर्हि[1] रामवाल्मीक्योर्महता कालव्यवधानेन भवितव्यं यतो रामो वेदकालिको राजा बभूव वाल्मीकिरर्वाचीनाया लौकिक-संस्कृतभाषायाः कविश्च। सत्सु वेदमन्त्रेषु श्लोकेषु च स्वस्मात् पूर्वमेव वाल्मीकिर्विस्मयते स्म स्वमुखादकस्माद्विनिर्गतः श्लोक इति। अयं खलु भवेत्कवेरभिप्रायो यद् व्यावहारिकलौकिकभाषया प्रथमः श्लोक आत्मना अप्रयत्नं प्रवृत्त इति। वाल्मीकेः काले संस्कृतभाषा रूपद्वयेन उपयुज्यते स्म, उन्नतभाषा साधारणभाषेति। अधुना प्रथमा वैदिकसंस्कृतभाषेति, अपरा लौकिक (काव्य) संस्कृतभाषेति च कथ्यते

---

1. वेदेषु केषाञ्चन राज्ञां नामानि विद्यन्ते। ते राजानः पुराणप्राचीनकाव्यप्रसिद्धा नहुषययात्यादय एव। यदि वेदे विद्यमानो नहुषो महाभारतीयो नहुष इति वयं विश्वसिमः तर्हि वेदोक्तो रामो रामायणीय एवेति बाढमङ्गीकुर्मः। प्रसिद्धो राजा राम एक एव विद्यते नान्यः अत ऋग्वेदे यो रामः कथितः स एव रामायणीयो भवेत्।

अस्माभिः। इत्थं भाषाया रूपद्वयस्थितेर्निदर्शनं सुन्दरकाण्डे चोपलभ्यते। सीतया सह सम्भाषितुमुपक्रममाणो हनुमान् कया भाषया अनया सम्भाषेयेति सम्प्रधारयत्येवम्।

"अहं ह्यतितनुश्चैव वानरश्च विशेषतः।
वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्॥
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
रावणं मन्यमाना मां सीता भीता भविष्यति॥"
(२८, १७-१८)

सम्भवतो वाल्मीकिः रामाद् बहुशताब्दानन्तरं बभूव। परम्परागत्या जनश्रुत्या रामकथां ज्ञात्वा तां काव्यरूपेण रचितवान् स्याद् वाल्मीकिः। यावत् सा कथा वाल्मीकेः श्रुतिं प्राप तावत्पूर्वमेव वास्तविकेतिवृत्ताद् बहुविपरिणतवती बभूवेति तर्कयामः।

रामो विष्णोरवतार इति भावना तेषु परिणामेषु अन्यतमा भवेत् तथा वानराणां मर्कटत्वपरिगणनं च। वानरा विन्ध्यपर्वतेषु तद्दक्षिणप्रान्तेषु च ऊषिवांसः पर्वतजातीयाः स्युरिति कश्चिद्विमर्शकः[1] अभिप्रैति। 'A tribe of Savaras

---

1. रामायणमुनन्दु वानरु लेवरु? (रामायणीयाः वानराः के?) आन्ध्रनिबन्धः। गो. रामदासु। भारति (आन्ध्र), मार्च, एप्रिल् १९२६.

is called Arsi or Arisi which means a monkey in the language of Savaras. By their Oriya neighbours they are called Lambo Lanjiya (long-tailed) which is the Oriya equivalent of Arsi. They got the name from a long piece of cloth which the males allow to hang down." (Castes and Tribes of South India, Thurston). (सवराणां काचिज्जातिः अर्शि अथवा अरिशि इति कथ्यते। सवरभाषायां तस्यार्थः वानरः। तेषां निकटवासिभिः ओडियाभाषिभिस्ते लम्वोलञ्जिया – दीर्घवालवन्तः इति कथिताः। ओडियाभाषायां समानार्थकं तत्पदमर्शेः। तेषां तन्नाम पुरुषाणां वस्त्रधारणविधानात् प्राप्तं यतः पुरुषा दीर्घवस्त्रमधो लम्बमानं धरन्ति।)

यद्यपि वाल्मीकिर्वानरान् मर्कटत्वेन अवर्णयत् तथापि मानवभावभरितान् तानकरोत। अपि च वानरकपिशाखा-मृगप्लवगादीनि कपिपर्यायपदानि तेषामुपयुज्यापि सर्वसाधारणं मर्कटपदमेकवारमपि न प्रयुयुजे मर्कटशब्दस्य सत्यपि कप्यर्थे आ वेदकालात्। अन्यच्च रामायणे पुरुषवानराणामेव वाला वर्णिता न तु स्त्रीणाम्।

स विमर्शकः सवरभाषायाः कानिचन पदानि वाल्मीकिना उपयुक्तानीति अभिप्रैति। एतानि जनपरम्परा-गत्या वाल्मीकिं प्राप्तानि यथाश्रुतं तेनोपयुक्तानि भवेयुः। विभीषणस्य भार्याया नाम सरमा। सा मञ्जुभाषिणीति

वक्ति वाल्मीकिः। किन्तु सरमा इत्यस्य पदस्य मञ्जुभाषिणीत्यर्थः सवरभाषायाम्। जटायुं "पितुः सखा" इति असकृद्वदति, भ्रान्त्या तस्य दशरथेन स्नेहं च प्रकल्पयति। अयोध्यायाः सुदूरे निवसतो जटायोः दशरथेन सह मित्रत्वमसम्भाव्यमेव। प्रायेण जटायुः कश्चिदाटविको भवेत्। जटायु (जटा+युव इति पदच्छेदः) पदस्य सवरभाषायां पितृपक्षीय इत्यर्थः। दण्डका (दान्+डाक्+आ) शब्दस्य सवरभाषार्थः बहुजलयुतम् इति। यद्यपि दण्डकावनं रामायणे कुत्रचिद् भस्ममयमित्युक्तमस्ति तथाप्यरण्यकाण्डे बहुजलाशयसम्पन्नमिति वर्णितम्।

इत्थं जनश्रुतौ रामायणवास्तविककथा विपरिवर्तिता काव्यरचनायाः पूर्वम्। रचनानन्तरं च काव्यं तद् बहून् परिणामान् प्राप।

सुन्दरकाण्डे हनुमत्कृतं लङ्कादहनं राक्षसैर्युद्धं च वाल्मीकेरनन्तरं केनापि काव्ये संयोजितं स्यात्। सीतान्वेषणं प्रारभमाण एव हनुमान् सावधानो भवति यदि राक्षसैर्दृष्टोऽभविष्यं तर्हि गृहीतोऽभविष्यमिति। वृक्षादवतीर्य सीतया सम्भाषितुमपि सन्देग्धि यदि गृहीतो वा हतो वा भवेयं तर्हि सीताया वार्तां रामस्य कथयितुं न कोऽपि भवेदिति। तथापि सीतायाः विश्वासं धैर्यं च जनयितुं संशयप्रमादयुतायामपि परिस्थितौ तामुपसर्पति। एतदवधि यद्यद् हनुमता कृतं तत्सर्वं त्रिवेकयुतमस्ति। अनन्तरं स हठात् परिवर्तते राक्षसैः

सह युद्धे स्वयं प्रवर्तते। आश्चर्यकरं स्वस्वभावविरुद्धं च तत्कृत्यं प्रतिभाति।

स्पष्टं विज्ञायते रामायणस्थं वालिवधसंघटनं वाल्मीकिरचनायाः पश्चात्परिवर्तितमिति। रामायणे सुग्रीवो वालिना सह द्विर्युद्ध्यते। प्रथमयुद्धे वालिना भृशं प्रहृतः पलायते। ततः पुष्पलतां कण्ठे न्यस्य स पुनः प्रेषितो युद्धाय। पुनश्च वालिसुग्रीवयोर्भीकरं युद्धं प्रवर्तते वाली हन्यते च।

मल्लयुद्धप्रवर्तितस्य कण्ठे पुष्पलता न तिष्ठति क्षणमात्रमपि। महाभारतारण्यपर्वणि रामोपाख्यानमस्ति[1]। तत्र वालिवधकथनमस्माद् भिद्यते। रामोपाख्याने वालिसुग्रीवयोरेकवारमेव युद्धं प्रचलति। प्रवर्तमाने तयोर्युद्धे हनुमान् मालां सुग्रीवस्य कण्ठे न्यस्यति अभिज्ञानार्थम्। ततो मनागपि कालविलम्बं न करोति रामः। धनुर्गृहीत्वा आत्मानं बाणलक्ष्यं कुर्वन्तं रामं दृष्ट्वा वाली भृशमबिभेत् क्षणान्तरे बाणविद्धः अपतत्।

---

1. बह्व्यो रामायणकथा लोके सन्ति। तासु प्राचीनतमे द्वे स्तः वाल्मीकीयं रामायणकाव्यं, महाभारतारण्यपर्वस्थं रामोपाख्यानं च। अत एते द्वे रामकथात्वेनास्यां चर्चायां परिगृहीते। अन्या आनन्तरिककल्पनासंवलिता उपेक्षिताः।

कथनमिदं सहेतुकं सहजमिवचाभाति। प्रायेण वाल्मीकिकृते मूलरामायणे कथितस्यास्य सन्निवेशस्येदं संक्षिप्तकथनं भवेद्रामोपाख्याने। अनन्तरं रामायणीयः सन्निवेशः परिवर्तित इत्याभाति। एकयुद्धस्थं भागद्वयं युद्धद्वयरूपेण वर्णितम्। किन्तु कथनेऽस्मिन् असहजत्वं दृश्यते खलु। अपि च रामायणे रामलक्ष्मणहनुमत्सुग्रीवा द्वितीययुद्धार्थं किष्किन्धां गच्छन्तः तथा मिथो भाषन्ते यथा ते प्रथमपर्यायमिव गच्छन्ति। प्रथमं युद्धं तत्पूर्वं संक्षेपेणोक्तम्।

रामायणे विद्यमानः सीताग्निप्रवेशसन्निवेशो रामोपाख्याने नास्ति परन्तु तादृशः अन्योऽस्ति तत्र। रामोपाख्याने रावणसंहारानन्तरं रामो लोकभयेन सीतां निराकरोति। तदा देवाः प्रत्यक्षा भवन्ति यथार्थकथनेन सर्वान् समाहितान् कुर्वन्ति। कथनस्य काव्यद्वये द्वैविध्यात् सन्निवेशोऽयं संशयं जनयति। अतः सीताग्निप्रवेशसन्निवेशः[1] अवाल्मीकीय इति तर्कयामः। कैश्चिद्गायकैरग्निप्रवेशसन्निवेशः कैश्चिच्च रामोपाख्यानसन्निवेशश्च कल्पयित्वा गीतौ भवेताम्।

---

1. पूर्वस्मिन् काले निरपराधः अग्निना न दह्यते जले न निमज्जतीति च जना विश्वसन्ति स्म। मृच्छकटिकनाटके मिथ्याभियुक्तश्चारुदत्तो दण्डादिष्टो मामग्निजलपरीक्षामकृत्वा दोषिणं निरनैषीद्राजा अधर्मोऽयमित्याक्रोशति। स्यान्नाम निर्दोषः अग्नौ पतितश्चेन्न

सर्वोऽप्युत्तरकाण्ड आनन्तरिकः अवाल्मीकीयः अनुबन्धो भवेत्। रामोपाख्याने बालकाण्डोत्तरकाण्डयोः कथाभागा न दृश्यन्ते। प्रत्युत उत्तरकाण्डीया बहवो विषयास्तत्पूर्वकाण्डानां बहूनभिप्रायान् विरुन्धन्ति।

उत्तरकाण्डे तपस्यन्तं शम्बूकं नाम शूद्रं हन्ति रामः। कारणं चोक्तं शूद्रैस्तपो न करणीयमिति। किन्तु रामायणकाले शूद्राणां तपोनिषेधो न दृश्यते। गजभ्रान्त्या दशरथेन हतो मुनिबालः शूद्रः। तपस्विन्याः शबर्याः जातिर्न कथिता रामायणे, नाम्नः किरातीति भाति।

उत्तरकाण्डे रावणो रम्भां हठसम्भोगेन दूषयति। सुन्दरकाण्डे सीतां प्रति तस्य प्रवर्तनं मनाक् सौजन्ययुतमिव दृश्यते।

> स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः।
> गमनं वा परस्त्रीणां हरणं सम्प्रमथ्य वा॥

दह्यते किमित्यस्माभिः शङ्क्येत। प्राचीनानां विश्वासस्तु न दह्यत इति स विश्वास एव सीताग्निप्रवेशाद्भुतसंघटनया निरूपितो रामायणे। काव्यसन्निवेशः काव्यदृष्ट्या द्रष्टव्यो न तु यथार्थदृष्ट्या। तथापि न युज्यते काव्ये रामस्य सीतानिराकरणं तस्या अग्निप्रवेशश्च।

एवं चैतदकामां तु न त्वां स्प्रक्ष्यामि मैथिलि ।
कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥
(५, १८, ५-६)

सीतायाः स्वच्छन्दाङ्गीकाराय कामनाय च उत्कण्ठते रावणः । न स तादृशो नीचो[1] यः स्त्रीषु बलवत्सम्भोगमनुभवेत् ।

उत्तरकाण्डे जनप्रवादाद्रामकृतः सीतापरित्यागो नास्माकं विवेकं मनश्च समादधाति । प्राचीनभारतीयसमाजेन पुरूरवा राजा स्वीकृतो यो देववेश्यामुपायच्छत, बहुभर्तृका द्रौपदी राज्ञी चानुमता । तादृशः समाजः अदोषां सीतां कथं न स्वीकुर्यात् ? अतस्तर्कयामः सन्निवेशोऽयं पश्चात्प्रकल्पितो रामायणे संयोजितश्चेति । किञ्चायं ग्रन्थभागो विवाहबन्धं[2]

---

1. महाभारतरामोपाख्याने च रावणेन रम्भा दूषिता स नलकूबरेण शप्त इति कथितम् । (आरण्य, २६४, ५८-५९) । किन्तु रामायणमिव महाभारतमपि बहुप्रक्षिप्तपरिणामैः संकुलं संजातम् । महाभारते च हनुमतो लङ्कादाहः कथितः (२६६, ६८) ।

2. चतुर्णामपिवर्णानां दारा रक्ष्यतमाः सदा ।
(मनुस्मृतिः, ८, ३५९)

मूलोच्छेदं प्रहरति। विहायापि दाम्पत्यानुरागं मानवकारुण्यं च[1] मताचारनियमेनापि विचारिते पतिपत्न्योरनुबन्धो नृपराज्ययोरनुबन्धात् प्रबलतरः। प्रव्रजितुमपि भार्याया वा मातुर्वा अनुमतिमपेक्षते पुरुषः। एवं व्यवस्थायां सत्यामनपराधां भार्यां कथं नाम परित्यजेद्रामः? पितुर्गौरवार्थं त्यक्तमेव राज्यं रामेण पूर्वम्। इदानीं च स्वकीयप्रेमास्पदस्य गर्भिण्या[2] भार्याया गौरवं रक्षितुं सुलभं त्यजेदेव राज्यम्। नहुषस्य प्रथमः पुत्रो यतिः स्वराज्याधिकारं विसृज्य संन्यस्तवान्। पितुः कृते भीष्मेणापि राज्याधिकारो त्यक्तः। तस्मात् कोऽपि निर्बन्धो नासीद्रामस्य राज्यपरिग्रहाय।

भारतीया बहवः कवयः प्रायेण सर्वे पठितारः सीतायां सानुभूतिमन्वभवन्। परन्तु न कोऽपि रामस्य कृतमाक्षिप्तवान् यतः स विष्णोरवतारः। दुर्दमाया अस्याः कथाया नाटकीकरणे भवभूतिर्नितान्तं मनःक्लेशमाप्तवान्। एको महाकविः

---

1. शापाद् विस्मृतेऽपि परिग्रहे केवलं गर्भिण्यां स्त्रियां कारुण्येन शकुन्तलां पुरोहितगृहे रक्षितुमादिशति अभिज्ञानशाकुन्तलें दुष्यन्तः।

2. दिलीपदुष्यन्तदशरथादयः पुत्रार्थं भृशं परितप्ताः। विलक्षणः खलु उत्तरकाण्डीयो रामो यः अन्तर्वत्नीं धर्मपत्नीं निष्कासयति।

कालिदासः केवलं सीतायां दयाप्रकटनेन न कृतकृत्यमात्मानममन्यत परन्तु राममाक्षिपत्[1] वाल्मीकिमुखेन ।

निदर्शनैरेभिः परिशीलनेनेदं फलति यद् वाल्मीकीये रामायणे न केवलं परिणामविवर्धनाति कृतानि अनुबन्धसमायोजनैः सह पूर्णतया पुनर्विरचितमेवेति । बालकाण्डारम्भे-केचन सर्गा वाल्मीकिकृता न सन्तीति स्फुटमेव । कविरात्मानमुद्दिश्यवाग्विदांवरः, महामुनिः, महाप्राज्ञः, भगवान् इति न क्वापि कथयेत् ।

सर्वं काव्यमनुष्टुभि च्छन्दसि रचयानीति वाल्मीकिरचिन्तयत् (१, २, ४०) । परन्तु विविधेषु च्छन्दस्सु रामायणे श्लोका विद्यन्ते । प्रायेण अन्यच्छन्दस्सु विरचिताः श्लोकाः सर्गान्तेषु दृश्यन्ते । संस्कृतकाव्यरचनासूत्रानुसारेण एकः सर्ग एकेन छन्दसा रचितव्यः सर्गान्ते च छन्दःपरिवर्तनं कार्यम् । किन्तु अयं नियमः अर्वाचीन एव । कालिदासः तदनन्तराः कवयश्च इमां पद्धतिं दृढमनुसृतवन्तः । महाभारतकाव्ये[2]

---

1. रघुवंश : १४, ७३ । यः कालिदासवाणीं वहुषु स्थलेषु दुर्व्याख्याभ्यो रक्षितवान् स मल्लिनाथः स्वयमिह दुर्व्याख्यां कुरुते "सीतानुनयार्थोऽयं रामोपालम्भ" इति ।

2 इतिहासो महाभारतं न तु काव्यमतच्छंदोनियमस्य तस्य प्रसक्तिरपि न स्यादिति न मन्तव्यम् । महाभारतं

पद्धतिरियं न स्वीकृता। अनेन ऊहितुं शक्यते यत् समस्तं रामायणमादौ अनुष्टुभा छन्दसा विरचितमिति। महता कालेन तस्मिन् काव्ये बहुप्रक्षिप्तपरिणामविवर्धनानि सम्भूतानि स्युः तत्र तत्र केचिद् भागा नष्टाश्च। तदा केनाप्यन्येन कविना स्वकालकाव्यरचनापद्धतिमनुसृत्य रामायणं पुनर्विरचितमिति, काण्डसर्गविभागश्च तेनैव कृत इति च तर्कयामः। प्रायेण प्रतिसर्गान्तं विभिन्नच्छन्दस्सु विद्यमानाः श्लोका अनेन विरचिता भवेयुः। प्रायेणैते सर्गान्तश्लोका

काव्यमिति इतिहास इति च प्राचीनानामभिप्रायः। गीताप्रेस् प्रचुरिते महाभारते आदिपर्वणि प्रथमाध्याये बहुवारान् महाभारतं काव्यमिति प्रोक्तम्। सुख्तङ्कर-प्रचुरणे १ १ २६; १, २, २३७, २४१ श्लोकानां चाशयो महाभारतं काव्यमिति।

इदं सर्वैः कविवरैराख्यानमुपजीव्यते।
उदयप्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः॥ (१, २, २४१)

काव्यस्य महाभारतस्य इतिहासत्वेनापि परिगणनं तस्य महत्त्वसूचकम्। न खलु महाभारतं कश्चिच्चरित्रग्रन्थो न तु काव्यमिति।

'इदं महाकाव्यमृषेर्महात्मनः। पठन्नृणां पूज्यतमो भवेन्नरः॥'
(हरिवंशः, पूनाप्रतिः, ११८, ४३)

नूतनभावरहिताः पुनरुक्तप्रायाः सर्गसंक्षेपकथनात्मका वा सन्ति। यद्यपि महाभारतात् प्राचीनमस्ति रामायणं भाषया अर्वाचीनवद् दृश्यते यतो रामायणं पुनर्विरचितं महाभारतानन्तरं काव्यमार्गे। किन्तु महाभारतमेव प्राचीनं रामायणादिति ये केचन वदन्ति ते भ्रान्ताः स्युः। महाभारते रामोपाख्यानमस्ति। तच्च कस्यचित्परिपूर्णमहाकाव्यस्य संक्षिप्तकथनमिव लक्ष्यते। अतो महाभारतरचनायाः पूर्वमेव रामायणेन भवितव्यम्। विपरिणतस्य पुनर्विरचितस्यापि रामायणस्य भाषा बहुषु स्थलेषु प्राचीना दृश्यते। किन्तु गहनीभूते प्रस्तुतरामायणे वाल्मीकीया मूलरचना का वा कियती वेति विवेचनमसाध्यमेव।

अन्याश्च बह्व्यः समस्याः सन्ति रामायाणे। स्वकृत्यं समर्थयन् रामेण वालिना कृतो वाग्वादः प्रौढिवाद एव। सुदूरादयोध्याया आगत्य मया त्वं मरणदण्डेन दण्डित इति न युज्यते रामस्य वादः। मर्कटहननं धर्मशास्त्रविरुद्धमिति धर्माकूतकर्ता[1] च रामस्य चर्यां राजकीयनीत्या समर्थितवान्। कवन्धोपदेशानुसारेण रामः सुग्रीवेण स्नेहं चकार। वाली स्वस्यैव भ्रातुर्भार्यामपाहरत्। प्रायशस्तेनैवकारणेन वालिना

---

1. रामकार्याणां धर्मशास्त्रानुसारव्याख्यानम्। कर्ता त्र्यम्बकरायमखी।

सह स्नेहो रामस्य अकार्यं आसीदिति ऊहनीयम्। स्वकार्यार्थं वाली हन्तव्यो बभूव रामस्य। शत्रुवधो निकृत्यापि कार्य इति राजनीतिः। काव्यीयो रामस्य वाग्वादः असमीचीनः।

लङ्का कुत्रासीत्? वर्तमानः श्रीलङ्केव लङ्केति रामो दक्षिणसमुद्रे सेतुं निर्माय तेन सागरं क्रान्त्वा लङ्कां जगामेति चिरन्तनो जनविश्वासः। तथापि विमर्शका विसंवदन्ति। रामायणप्रामाणिकप्रतेर्बालकाण्डस्य सम्पादकः (G. H. Bhatt) पम्पा आन्ध्रदेशीया नदीति किष्किन्धा हम्पीसमीपस्थेति श्रीलङ्का लङ्केति साधारणाभिप्रायमङ्गीकरोति। किन्तु किष्किन्धाकाण्डस्य सम्पादकः (D. R. Mankad) लङ्का विन्ध्यपर्वतनिकटस्था भवेदिति प्रतिपादयति। रामायणे वर्णिता पम्पा दक्षिणदेशीया न स्यात्। सा विन्ध्यपर्वतीया स्याद् यैव कादम्बर्यां वर्णिता। अङ्गदादयो वानरा ये दक्षिणस्यां दिशि सीतां व्यचिन्वन् ते विन्ध्यपर्वतेष्वेवान्वेषणं चक्रुः। यावदन्वेषणं कृतं तैस्तावद् विन्ध्येषु कृतं न ते विन्ध्यान् जहुः। तत्पर्वतात्ते कञ्चन सागरं ददृशुः। तं क्रान्त्वा हनुमान् लङ्कां ययौ। तस्मात् कतिभ्यश्चिन्मासेभ्यः पूर्वं तमेव सागरं रथेन क्रान्त्वा रावणः सीतापहरणाय जगाम। सागरः स वृक्षशिलादिभिः संक्रमं निर्माय वानरैस्तीर्णश्च। सागर इति कथनं कवित्वातिशयोक्तिर्भवेत्। स प्रायेण गाधो विस्तीर्णः कश्चिज्जलाशयो भवेन्नतु समुद्र इति तस्याभिप्रायः।

अस्याभिप्रायस्येदं मनाग् बाधकमिवास्ति यद् गोदावरी नदी काव्ये असकृदाख्याता। सीतारामलक्ष्मणा गोदावरीतीरे पर्णशालायां न्यवसन् यस्याः सीता रावणेनापहृता। किष्किन्धाकाण्डस्य संपादको गोदावरीपदं काव्ये प्रक्षिप्तं स्यादिति सा काचिदन्या नदी भवेदिति च सूचयति। किन्तु रामायणे रामोपाख्याने च गोदावरी नदी आख्यातास्ति। परन्तु सा दक्षिणदेशीया सुप्रसिद्धा नदी उत विन्ध्यपर्वतस्थासु बह्वीषु अल्पनदीषु अन्यतमेति न ज्ञायते। यथा मन्दाकिनीति अल्पनदी चित्रकूटे कथिता काव्ये (२, ८९, १) सुप्रसिद्धाया मन्दाकिन्या अन्या तथैवान्या गोदावरीनाम्नी अल्पनदी च तत्र भवेत् प्रसिद्धाया गोदावर्या भिन्ना।

सीता रावणेन अपहृतेति जटायुद्वारा रामस्य ज्ञातमिति रामायणे रामोपाख्याने च लिखितम्। किन्तु सुग्रीवो वदति नाहं जानामि रावणं तस्य निवासं चेति। विचित्रमेतत्कथनं यतो रावणः सुप्रसिद्धः। यदि रावणेनैव सीता अपहृतेति ज्ञातं स्यादङ्गदहनुमदादयो दक्षिणदिशायां पर्वतप्रदेशान् समस्तान् अन्विष्यन्तः पूर्णं कालव्ययं न कृतवन्तः स्युः। ततो यथार्थचरित्रे सीता केनाप्यपहृत्य दक्षिणतो नीतेति

एतन्मात्री प्रवृत्तिस्तेषां ज्ञाता भवेत् । तत एव दक्षिणस्यां दिशायां तस्या अन्वेषणे प्रबलाः प्रेषिताः । अन्यासु च दिक्षु अन्वेषणा कृता कदापि अन्यप्रदेशे सा नीता भवेदिति ।

न केवलं रामायणं प्रक्षिप्तादिभिः परिवर्धितमभवत् तस्य केचन भागा नष्टाश्चेति प्रतिभाति । अयोध्याकाण्डे कैकेयी मन्थरां बहुकालानन्तरं भरतश्च राजा भविष्यतीति वदति (२, ८, ९) । कथमेवं मन्यते कैकेयीति न ज्ञायते । रामादनन्तरं तस्य पुत्रो राजा भविष्यति । कैकेय्या एताव-न्मात्रमपि राजकीयज्ञानं नासीत् किम् ?[1] यदि रामो युवराजो[2]

---

1. वैवाहिकीं प्रतिज्ञां भङ्क्त्वा दशरथो भरतं राज्याधि-कारात् साकल्येन नापसारयिष्यतीति, भरतः कदापि राज्यं राज्यभागं वा वेत्स्यतीति कैकेय्या विश्वासो भवेत् । अतो रामस्य यौवराज्याभिषेकं सा अङ्गीकरोति ।

2. दशरथो रामं युवराजं कर्तुं प्रायतत । (अयो, १, ३४; २, १०; बहुषु चान्येषु श्लोकेषु ।) दशरथस्य धर्मद्वय-सङ्घर्षः समजनि । कैकेयीविवाहशुल्कत्वाद्राज्याधिकारो भरताय देयः, ज्येष्ठपुत्रत्वाद्रामाय च । तयोर्ज्यायान् धर्म इति स रामं भविष्यति काले राजानमभिलष्य सम्प्रति यौवराज्ये स्थापयितुमियेष । प्रायो युवराजो राजा भविष्यति । न हीद नियतम् । सत्यप्यङ्गदे

भविष्यति तर्हि राज्याधिकारं स्थिरीकर्तुं भरतं स हनिष्यतीति मन्थरा कैकेयीमुद्बोधयति। भीता कैकेयी तां मतिं स्वीकृत्य भरताय यौवराज्यं सम्पाद्य रामवनवासं विदधाति यतो रामेण राज्ये न स्थातव्यं भरतस्य क्षेमाय। का नाम माता स्वपुत्रस्यापदं सहेत ? काव्ये मुख्योऽयं सन्निवेशः। परन्तु कैकेय्या मनो न ज्ञायतेऽत्र। प्रायेणात्र किञ्चिद्भागो नष्ट इति तर्कयामः।

रामो वसन्तकाले सुग्रीवं मिलति। वालिवधो वर्षाकाले कृतः। किं कृतं रामेण तदन्तरे किमर्थं चालस्यं कृतम् ? अत्रापि किञ्चिद्भागेन नष्टेन भवितव्यम्।

विमर्शो रामायणग्रन्थस्य, परिशीलनं काव्यभाषायाः तथा कासाञ्चन मध्यदक्षिणभारतभाषाणां, परिशोधनं चारित्रिकपुरावस्तूनां च कर्तव्यमस्ति समस्यानामासां समाधानोपलब्धेः।

स्वपुत्रे "यौवराज्येन सुग्रीवं तूर्णं साऽभिषेचय" (कि, १५, २०) इति तारा वालिनमुद्बोधयति। भीष्मो भीमश्च युवराजौ बभूवतुः (महाभारतम्, गीताप्रेस्, आदि, १००, ४३; शान्ति, ४१, ९) न तु पश्चाद्राजानौ। अतः कदाचिद् राज्याधिकारविहीनोऽपि तात्कालिको युवराजः क्रियेत। दशरथो रामं सम्प्रति युवराजं चिकीर्षितवान् न राजानमतः एव कैकेयी विवाहशुल्काग्रहमकृत्वा अन्यदा सम्प्राप्तौ वरौ उपयुज्य भरतस्य यौवराज्यं रामस्य विवासनं च सम्पादितवती।

Sanskrit Sansthan (Deemed University) Rajiv Gandhi Campus Sringeri LIBRARY

शोधनम्

पृटः	पङ्क्तिः	स्खलितम्	शुद्धम्
21	16	उथ	अथ
	19	ऋृष्यमूके	ऋष्यमूके
23	18	ऋृक्ष	ऋक्ष
31	8	बालिनं	वालिनं
37	5	वियोणितः	वियोजितः
44	13	तथ	तथा
45	5	?	।
48	4	वितन	वितत
49	14	नाद्यान्ते	नाद्यन्ते
52	11	तद	तद्
54	11	क्बापि	क्वापि
67	13	चैयो	चैत्यो
68	13	वक्षस्य	वृक्षस्य
	14	द्व	द्वे
69	19	परिवंतो	परिवृतो
75	19	कर्तंव्या	कर्तव्यं
79	10	कणनास	नासा
81	9	भ्रतः	भ्रातः

18983

ग्रन्थकर्तुः अन्याः कृतयः

संस्कृतग्रन्थः : साहितीजगती ··· काव्यविमर्शः ।

(उत्तरप्रदेशप्रभुतया पुरस्कृतोऽयं ग्रन्थः ।)

आन्ध्रग्रन्थाः : साहितीजगति ··· काव्यविमर्शः

वाङ्मयसमालोचनमु ··· काव्यविमर्शः

नाटकरत्नावलि ··· नाटकत्रयसमुच्चयः

मनोविहंगं इतरकथलु ··· कथानकसमुच्चयः

मृगतृष्ण ··· लघुकाव्यसमुच्चयः